Digitized By Siddhanta eGangotri Gyaan Kosha

विषमपरिणयम्।

—राजेन्द्रशंकर लालशंकर पंड्या।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

विषमपरिणयम् ।

FATAL MARRIAGE.

A drama in Sanskrit in five acts.

by:

G. L. Pandya, M. A. B. T.

0-12-0.

1932.

1939.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

Printed by :—Moolchand Kasandas Kapadia
at Jain Vijaya Printing Press, Khapatia Chakla—SURAT.

Published by :—Gajendrashanker Lalshanker Pandya.
DEVGAD BARIA (Rewakantha).

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

निवेदनम् ।

विषमपरिणयमित्येतन्नाटकं संस्कृतनाट्यशास्त्रनियमादीननुसृत्य न योजितम् । अत्र भरतनाट्यशास्त्रविरोधकः कश्चिद्धेतुर्नास्माकं मनोभूमौ वर्तते । वर्तमानगुर्जररङ्गभूमौ नाट्यमानानां नाटकानां विशेषत आङ्ग्लभाषायां लिखितानां नाटकानां संस्कारैः संस्क्रियमाणेन मनसैतन्नाटकम् रचितमिति योग्यम् नाट्ये प्रयुक्तपदस्याभिनितार्थ बोधकत्वात् । एवं स्थिते युगागतप्रथा त्यक्ता भवेदिति न किञ्चिदाश्चर्यकरं संक्षोभकरं वा । तथा एतन्नाटकं कस्मात् करुणान्तं पयुक्तमिति प्रश्नो निरवकाशः । नायिका मृत्युमवाप्नोति विषप्रयोगात्प्राणांस्त्यजंती समुपस्थापिता रङ्गभूमौ तथैव च नायकः समुज्वलंत्यां चितायां शरीरपातेन प्रियामनुसरन् संदर्शितः । भरतनाट्यशास्त्रं शब्दशोऽनुसरतां वर्तमानागामिनां कवीनामथवा तच्छास्त्रनियमानेव प्रमाणीकुर्वतां लेखकानामुद्वेगकारिणी विषमपरिणयेऽङ्गीकृता रीतिः कदाचिद् भवेत् । तत्रैतेषां कवीनां कवीश्वराणां लेखकानां चानुग्रहोऽस्माभिः प्रथमतएव याच्यते ।

करुणान्तं नाटकं लेख्यं वा नाट्यं न वेति नास्माभिः प्रश्नोऽत्रोद्भाव्यते । गुर्जरत्रादेशे विशेषतः सौराष्ट्रे वृद्धलग्नमद्यापि न निर्मूलीभूतम् । कन्याविक्रयोऽपि दृढबद्धमूलः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

एनयोरुन्मूलनार्थं पुनः पुनः प्रवर्तमानेषु पण्डितजनेषु विविधासु विरोधकबाधकसभासु स्थापितासु प्रगतिकारिणीषु मण्डलीषु समुपस्थितासु केचिज्जडमानसा मानवाधनोपार्जनार्थं प्रगतिप्रबाधनार्थं निज मन्तव्यस्य दृढीकरणार्थं संस्कृतविनीतमानवानामुद्वेगकरणायैव कृतनिश्चयाइव येनकेन प्रकारेणा सदृशमारभन्ते। तथास्थित एकत ईदृशीममङ्गलकारिणीं प्राचीनरूढिमङ्गीकृत्य तां तत्वतोऽनुवर्तमानस्य मानवसमूहस्यान्यतस्तदून्मूलनार्थं कृतमतेर्विनीतमानवसमूहस्यान्योन्यस्य विरुद्धं कार्यमारब्धमस्मिन्नाटके संदर्श्यते। तत्र मूढजनैरङ्गीकृता रूढिर्यौवनावस्थां गतयो र्युवतीयुवकयो र्हृदयस्पर्शीप्रेमभावनिरूपणेन तदङ्गत्वेन करुणदशादिप्रसङ्गात् वाचकजनस्य हृदयेनार्द्रतां नीतेन तिरस्कारास्पदं कृतास्यादित्यस्माभिः करुणान्तः प्रयोगो योजितः। बहवोऽन्ये संसारव्यवहारप्रसंगसंस्करणार्थं प्रश्नादृष्टितलगता वर्तन्ते। परन्तु प्रथम एष एव प्रसङ्गवशान्निरूपितः। न वयं पाणिन्यादिव्याकरस्याध्येतारः। न वाऽस्माकमाधुनिकरूढ्यनुसारेण कृतसंस्कृतभाषाध्ययनेन भाषासंस्कारः सुलभः। तथा ये केऽपि दोषाः पण्डितजनानां दृष्टिपथं गता भवेयुस्ते क्षम्येरन्नित्यत्र न कश्चित्संशयोऽस्माकं हृदये वर्तते। पण्डितजनानां मार्गदर्शनं यथास्थाने सूचनं वाऽस्माभिः शिरसि कृत भविष्यतीतित्यत्रनास्ति कश्चित्संदेहः।

देवगढ बारीया
रेवाकांठा एजन्सी
भारतवर्ष
आश्विन् शुक्ल पञ्चमी
१९८८.

गजेन्द्रशंकर लालशंकर पंड्या
एम. ए. बी. टी.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

सद्गृहस्थ जेकीसनदास कल्याणदास.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

[illegible] साहित्यरसिक सद्गृहस्थ

[illegible] कल्याणदास गज्जराय

[illegible]

[illegible]

[illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

माननीय वृद्ध साहित्यरसिक सद्गृहश्रेष्ठि–

जेकीसनदास कल्याणदास गज्जराय

तस्य सुपुत्रस्याभिनयकलारसिकस्य

धनसुखलालस्य प्रणयवशात्

समर्पितम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

Sole agents: N. M. Tripathi & Co.
Princess street, Bombay.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

पात्रपरिचयः ।

सुन्दरदासः—कश्चिद्वणिक् ।

शान्तिदासः—तस्य भ्राता ।

मनोहरदासः—सुन्दरदासस्य पुत्रीं काम्यमानः कश्चिद्युवा ।

देवीदासः— कश्चिद्वृद्धवणिक् सुन्दरदासस्य जामाता ।

जयदासः— सुन्दरदासस्य श्यालः ।

नगररक्षकाः वैद्यः अन्ये च जनाः—

लावण्यवतीः—सुन्दरदासस्य पुत्री ।

दुःशीला— सुन्दरदास भगिनी, देवीदासस्य भ्रातृभार्या ।

मञ्जरीः—मनोहरस्य भगिनी ।

अन्ये स्त्रीजनः ।

स्थानम्—मुम्बापुरी समीपस्थम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

DRAMATIC PERSONAE.

SUNDERDAS—A Bania.

SHANTIDAS—his brother.

MANOHARDAS—an educated youth in love with Lavanyavati, the daughter of Sunderdas.

DEVIDAS— An old but rich man selected by Sunderdas to marry his daughter Lavanyavati.

JAYADAS— Brother-in-law to Sunderdas.

Police, Doctor and others.

LAVANYAVATI—Daughter of Sunderdas.

DUSHILA— Sunder's Sister.

MANJARI— Manohar's Sister.

OTHER WOMEN.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

श्री गणेशायनमः ।

विषमपरिणयम् ।

प्रथमोऽङ्कः ।

वंदे देवगणाधिनाथ! विमलं श्रीशारदाभीप्सितम् ।
साहित्याक्षरगव्यसागररतं त्वामम्बिकाबिम्बितम् ॥
जिह्वाग्रेण सरस्वतीकृतजगज्जालाम्बुबिन्दुं यथा ।
प्रीत्या धारयता त्वया मुखबिले देवो वराहो जितः ॥१॥
त्वां विधिविहितगुणनिधिं दृष्ट्वा स्त्रीरत्नयुग्ममुपयातम् ।
लज्जामुपनीतोऽतः क्रोधाद्गर्जति रत्नाकरः ॥ २ ॥

[नाद्यन्ते सूत्रधारः]

सूत्रधारः—अद्याज्ञप्तोऽस्मि मित्रजनेन यथा देशरीतिरूढ्या-दीनामुन्नतिकरं युगसदृशमतिवर्द्धनकरं च किञ्चिन्नाटकं नाटयेतव्यम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

मया च गुरुत्रादेशं सूर्यपुत्र्यास्तप्त्याः पुण्योदकेन प्लावितोपकण्ठे चतुःसीमान्तगतमहादेवदेवालये सूरताख्यनगरे निवसतः साहित्यविलासीपण्डितलालशंकरसुतगजेन्द्रशंकरेण वडनगरानागरज्ञातावुत्पन्नेन श्रीहयग्रीवदेवताप्रसादाल्लिखितं विषमपरिणयं नाटकं संवृतम् । तन्नाटयितव्यमिति प्रियायै निवेदितम् । अद्यापि तया किमनुष्ठितमिति विविधकार्यव्यग्रेण मया न ज्ञायते । [नेपथ्याभिमुखं दृष्ट्वा] कुत्र गता त्वम् ।

नटी–[संभ्रान्ता प्रविश्य] त्रायस्व त्रायस्व त्रायस्व नाथ ! त्रायस्व बराकीं बालिकां मूर्खजनैः पीड्यमानाम् ।

सूत्रधार–किमापतितम् । [नेपथ्ये कलकलः]

नटी–श्रूयतां हृदयतन्तुविदारक आर्तनादः । निवारितगृहप्रवेशस्य भवतो भ्रातुः सुन्दरदासस्य पञ्चदशवर्षदेशीयाऽज्ञातसंसारा बाला लावण्यवती नाम मृत्युदंष्ट्रागृहीतस्य लालाप्लावितमुखस्य वणिजो देवीदासस्य हस्तं ग्राह्यते । श्रुतिशास्त्रप्रमाणैर्वाऽऽर्यजनसमुचितवर्तनोपदेशैर्वा तस्याः पितरं वारयितुं भवदितरो न कोऽपि शक्तः ।

सूत्रधार–आर्ये ! किमेतत् । प्रतिज्ञाताऽऽसीत्सा मनोहरदासाय । कथमनेन समयभङ्गः कृतः ।

नटी–तेन वृद्धेन सह तथा निभृतमतिसुगुप्तं च भवतो भ्रात्रा समयः कृत आसीद्यथा केनाप्यस्य कार्यस्य गन्धलेशोऽपि न लब्धः। अनयैव घटिकया वर आहूतः पुरोहितोऽन्ये नरनारीजनाश्च ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

सूत्रधार–अहो ! मूर्खजनसंमोहः। मनोहरदासो वाराणसीं गतः। स अस्यां दृढबद्धभावो वर्तते। अनेन तावदेवमनुष्ठितम्। अपि च न वर्तते परिणयस्येदृशस्य प्रतिबाधनार्थमवसरो न्यायाधीशस्याज्ञालेखं लब्धुम्। तथापि यतिष्ये यथाशक्ति।

कोमलं वल्लरीवृन्तं संवर्ध्यामृतबिन्दुना।
प्रवृत्तो वज्रपातेन दग्धुं मूर्खः कृषीवलः॥ ३॥

[इति निष्क्रान्ते]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

[लग्नमण्डपे लावण्यवती पित्रा साक्रोशं देवीदासस्य हस्तं ग्रहीतुमाज्ञाप्यते । सा च तस्यादेशपराङ्मुखी रुदती तत्स्थानात्पलायितुं प्रयतते ।]

लावण्यवती–[समाक्रोशन्ती] रे ! रे ! युवकगणः ! रक्षत रक्षत मामेकाकिनीं पाषाणहृदयेन मातुलेन बलात्कृष्यमाणामदूरंस्थितं वधस्तम्भमिव जराजर्जरितवृद्धं परिणेतुम् ।

सुन्दरदास–अयि दुर्विनीते ! आचारं प्रतिपद्यस्व । न जाने क्रोधप्रज्वलितमानसोऽहं किं करिष्ये । जयदास ! कथं मूढ इव स्थितः । आनयैनां केशेषु गृहीत्वा ।

लावण्य०–[जयदासेन पीड्यमाना] मातुल ! मातुल ! मा तोडय मां केशैः । एनां केशरज्जुं मम गले कृत्वा कृतान्तमिवात्मानं संदर्श्याकृष मे प्राणान् । अथवा निबिडिताङ्गीं मां कृत्वा पातय वृश्चिकसर्पादिपूर्णे कस्मिंश्चिदपि कूपे यत्र स्थिताऽनेकजीवानां दुर्बलाङ्गानां भोजनविषयं प्राप्ताऽहमात्मानं कृतकृत्यं मंस्ये । अनेन तु मृत्युदन्तैश्चर्व्यमाणेन जरठेन गृहीताया एकस्यापि जन्तोः प्राणधारणं कर्तुमसमर्थायाः कुतो मे जीवितसाफल्यम् ।

सुन्दर०–पण्डिते ! मुञ्च ते वाक्कलकलम् ।

देवीदास०–[स्वासनात्कथंकथमप्युन्नमय्यात्मानम्] अहो ! शोभनाङ्गि ! मा मामन्यथा वर्णय । ज्योतिर्विद्भिर्ममायुष्यं पञ्चाशदधिकशतमिति शास्त्राधारेणानेकश आयुर्भवनं समालोच्य निर्णीतम् । अद्य तावन् मम सप्ततिवर्षदेशीयस्य तदनुसारेण युवावस्थाप्रवेश एव ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

लावण्य०–विगतरसवृक्षस्य जीर्णशाखापत्रैर्नवमालिकासमालिङ्गने कीदृङ्मनोरथः । पश्यत पश्यत नवाम्बुबिन्दुपाशनोत्सुकाश्चातकयुवतयः–

ग्रीष्माग्रे गगनाङ्गणे रविकरेणाप्लाव्यमाने शुभे ।
कश्चिद्भ्रष्टजलाम्बुदो धवलितो रेखावशेषं गतः ॥
मन्दं वक्तुमपि प्रयासितमुखः श्वासोपरुद्धः स्थितः ।
शुष्कौष्ठः स्वमुखादसौ कृशकरो दातुं प्रवृत्तो जलम् ॥४॥

अपि च

आकाशे विपुलोदरे कृशतनुर्धृत्वा स्थितिं मात्स्यिकाम् ।
संबन्धाज्जलधेश्च मूढजलदः पूर्वां स्थितिं स्मारयन् ॥
स्वातेर्योगमपि क्षणं विगणयन् क्षीणोदकोऽसौ जलम् ।
युक्तिं पाययितुं प्रवर्तत अहो ! पश्याम्बुदं वारिजम् ॥५॥

जयदास–किमेभिः प्रलपनैः । न सुविद्याऽलंकृतस्य त्वादृशस्य कन्यारत्नस्यैष समुदाचारः समुचितः । संवृतोऽसौ तव पित्रा त्वया सर्वथा पतिरिति पूजनीयः ।

लावण्य०–अहो ! न कोऽपि युवक ज्ञातिबन्धुर्दृश्यते । मातुल ! कथं भवता कंसवृत्तेः प्रथमं किरणमाविष्क्रियते । कथं विनाशपथं नीयते कुलोत्सादनवृत्त्याऽऽर्यजनसमुचितहृदयभावः । [प्रत्युत्तरमलब्ध्वा] हन्त ! कुत्र परित्राणं लभ्येत यद्यातपत्रमेव तपनत्रासमुद्भावयति । [ज्योतिर्विदा मुहूर्तवेलामाघोषयन्ति]

सुन्दर०–मूढे ! परिहीयते मुहूर्तवेला । न श्रूयंते किं त्वया ज्योतिर्विद्भिराघोष्यमाणा मुहूर्तघटिकाः । पश्याधुना तेऽपि जडीकृता इव दृश्यन्ते ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

मुकुलितनयनास्ते विह्वलाबद्धतारा ।
विकसितमुखरन्ध्राभासमाना रदाग्राः ॥
किमिदमननुरूपं न्यस्तमत्रेत्यतर्काः ।
स्थिरशुचिरसनाग्राश्चित्रभावं भजन्ते ॥ ६ ॥

अपि च

काश्चित्कन्या वलितवदनाः किञ्चिदानम्रमूर्ध्ना ।
काश्चित्कान्ता मथितमदनाः किञ्चिदाकुञ्चिताक्ष्णा ॥
काश्चित्प्रौढाः सुनतनयनाः किञ्चिदुन्मीलिताक्ष्णा ।
जातोद्वेगास्तव कुचरितैस्त्वामतस्तर्जयन्ते ॥ ७ ॥

अपरं च

काश्चिन्नार्यः सुमधुरतया कोकिलाः स्मारयन्त्यो ।
रक्तोष्ठाभ्यां जलकमलजं रागमुन्मीलयन्त्यः ॥
गातुं गीतं मुदितमनसा यावदेताः प्रवृत्ताः ।
तावद्दृष्ट्वा विपथगतिकां भग्नकण्ठाः स्थितास्त्वाम् ॥८॥

लावण्य०—मा मैवम् । यथा मामुद्दिश्य भवानेतच्छ्लोकत्रयमुद्गिरति तथा भवन्तमनुलक्ष्याहमपि तथैव वाच्मि । मम तु तावदेतदन्यत्कथनीयं वर्तते ।

अग्निः प्रज्वलितः पुनः पुनरसौ संधूयमानेन्धनो ।
नाभेश्चालितवायुपूरितमुखाद्विप्रेण संभावितः ॥
साक्षाद्भावगतोदयेरित इमां दुर्भागिनीं मानयन् ।
शैत्यं याति पुनः पुनः प्रकुपितः शीतेन ते कर्मणा ॥९॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

सुन्दर०—जयदास ! न ते पौरुष विद्यते यथा भवानप्यसंबद्धप्रलापिन्या ईदृशसंभाषणे दत्तकर्णस्तिष्ठति। आकृष बलादेनामत्रः।

देवी०—श्वशूरवर्य ! सुकोमललता कशाप्रहारेणाभिहता मार्दवं त्यजति। हताङ्गी च विरूपा भवति। यथाऽस्याः शरीरसौष्ठवं सौन्दर्यं चाहते स्यातां तथा शनैः शनैरानयैनाम्।

लावण्य०—अहो ! वृद्धशृगालस्य हरिण्यां दयाभावः।

देहो जर्जरितस्तथैव नयने श्वेतास्त्वचो मूर्धजाः।
क्षीणा वाग्वदतो मुखं रसनया लालाभृतं दृश्यते॥
शीतः श्वेतकरः कृतान्तवितो देहं खलु स्पृष्टवान्।
जीर्णं सर्वमनेन किन्तु हृदयं जीर्णं कथं नो कृतम्॥१०॥

सुन्दर०—आनय सत्वरं शशकवदेनाम्। अथवा हस्तपादौ संयम्य मुखं च कर्पटपूर्णं कृत्वा विकृष।

[जयदासस्तथा कर्तुं प्रयतते। लावण्यवती चावधीरयते]

जय०—दुर्विनीते ! विनयं प्रतिपद्यस्व।

लाव०—प्राणमोक्षं वरं मन्ये न तु वृद्धहस्तग्रहणम्।

जय०—तर्हि त्वरितमनुभव पितृमातुलकोपप्रसादम्।

[ताडयति बद्धुं च प्रवर्तते]

लावण्य०—[समाक्रोशन्ती] त्रायताम् त्रायताम् यदीदृशस्य परिणयस्य विरोधी कलियुगेऽस्मिन्नथवाऽबलाजनस्य दुःखेन समदुःखः श्रृणोति माम्।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

सुन्दर०—एवमेवं समाकृष द्रुततरम् ।

लावण्य०—[पुनः प्रलपति ।

[नेपथ्ये]

शान्तिदास—तिष्ठ ! तिष्ठ ! रे मूढ ! कथमुन्मत्तो दुर्गज इव कमलनालिकां निष्पीडयितुं प्रवृत्तः ।

सुन्दर०—[समाकर्ण्य चकितः] क एष विनीतवेशोत्रैवाभिवर्तते ।

शान्ति०—[प्रविश्य] किमनया पिशाचवृत्त्या ।

[जयदासहस्ताल्लावण्यवतीं मोचयति,
जयदासस्तु पुनरेनां गृह्णाति ।]

पिशाचादुद्भूतिस्तव मतिरभूद्वा यमकृतौ ।
किमुद्वृत्त्या लब्धं जडहृदयमाखेटकजनात् ॥
गवादिभ्यो दत्तस्तव हृदयभावोऽत्र विधिना ।
कृता वा येनैते सदयहृदयास्त्वं च विगुणाः ॥११॥

मुञ्च मुञ्चैनामथवा वज्रमुष्टिर्मे विगतसंज्ञं त्वां पातयिष्यति ।

[लावण्यवतीं मोचयति]

सुन्दर०—अहो ! शान्तिदासः । भ्रातर् ! ननु बाललग्नविरोधप्रचारकस्त्वमागतः । निष्क्रम निष्क्रम इतः स्थानादनेनैव क्षणेन । अथवा न जाने किं मया कृतं भविष्यति ।

शान्ति०—रे धनलोलुप ! अस्या बालिकाया विप्रियकरणे प्रवृत्तस्य तवाऽपि किं विप्रियं मया कृतं स्यात्तदहमपि न जानामि । कस्मैचित्सुवयसे सुवर्चसे सुविनीताय मनोहरसदृशयुवकाय प्रयच्छैनामित्येव मे कथनीयम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

सुन्दर०—कस्मै दातव्या मे कन्येति विचारणायामहमेव प्रमाणम् । अनिमन्त्रितस्त्वं छिन्ननासिकः कृतापमानोऽपि पुनरायातो मङ्गलकार्यबाधामुत्पादयितुम् । अपेहि ! मूढ ! अपेहि—

अर्थो हि कन्या पितुरेव जात-
स्तस्य प्रदाने जनकः प्रमाणम् ॥
कस्मै प्रदेयं निजशुक्तिजातम् ।
रत्नाकरः पृच्छति किं समुद्रम् ॥

शांति०—श्रावण्यवती ते कन्या । तथाप्येषा त्वत्तोऽन्योजीवः । कथं स्वार्थवृत्तिमाश्रित्य प्रवृत्त एनां विनाशयितुं भवान् । न कर्णपथं समायातं भवतो यथा—

लब्ध्वा तोयनिधेर्जलं जलधरः संप्राप्तकाले निजाम् ।
वर्षाभावगतां तथा दुहितरं दातुं प्रवृत्तो भवेत् ॥
त्यक्त्वा शुष्कमरुस्थलं गिरितटं पीनोन्नतं प्राप्नुयात् ।
दुग्धं शर्करया च स्वादु भवति ज्ञातं न किं तत्त्वया ॥१३॥

सुन्दर०—मामपि सम्बोद्धुमुपालब्धुं च प्रवृत्तस्त्वम् न च मे कन्यादानावकाशं प्रयच्छसि । रे गणदास ! सत्वर समाहूयन्तां रक्षकाः । अर्धचन्द्रप्रदानेनैवासौ निष्कासयितव्यः ।

देवी०—पितृव्यश्वशूर ! शरदां द्विशतं जीवेति ज्योतिर्विद्भिर्दत्ताशीर्वादोऽहम् । घृतप्लुतरोटिकाभक्षणे प्रवृत्तस्य बिडालस्य इव साभिलाषं मे मनोऽस्यां कन्यकायाम् । पश्य कियन्मूल्यानि कियन्त्याभरणानि कियन्ति च बहुमूल्यानि काशीखण्ड'बसमा'-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

ख्यानि सुवर्णस्वस्तिकालंकृतोपान्तपल्लवानि क्षौमवस्त्राणि ममास्या वल्लभायाः कृते क्रीतानि ।

शान्ति०—जरठ ! गलितदन्तः शृगाल इव कथं त्वं मृगी-भक्षणे प्रवृत्तः । प्रकृत्याऽपि वर्जितो नवयौवने वर्तमानायाः पूर्ण-चन्द्रिकायाः क्षीणनिशानाथेन संबद्धः ।

यो जीर्णदेहशकलं शशकं नु वैकम् ।
दैवाद्गतोप्यमरतां नहि भर्तुशक्तिः ॥
योगो हि कृष्णनिशया कथमस्य भाव्यः ।
क्षीणेन्द्रियस्य सितया क्षपया कथं वा ॥१४॥

देवी०—मा मैवम् । यथा भवतो बन्धुर्मया निष्कसहस्रं दत्त एवं च सुपरितोषितस्तथा भवतोऽपि पारितोषं कुर्याम् । एहि बन्धो ! गृहाणाभरणानि ।

शान्ति०—अरे ! किमनेन, कन्या विक्रीता । [सविषादम्] रे बन्धो ! कस्मात्त्वयेदं पापतमं कृत्यमनुष्ठितम् ।

अलंकृत्य निजकन्यां देयान्न गृह्णीयाद्धनलेशमपि ।
स्वकुलमप्यात्मना सह पातयति नरके न चोद्धरति ॥१५॥

अपरञ्च !

कन्यामीदृशमानवाय ददता पापं त्वयैकं कृतम् ।
लब्ध्वा लुब्धकमानसो धनमिदं पापं द्वितीयं कृतम् ॥
निःश्वासो हृदयोद्गतस्त्रिभुवनं दग्धुं समर्थो भवेत् ।
ज्ञात्वैतद्विरमाथवा तव कुलं सच्छिन्नशाखं भवेत् ॥१६॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

सुन्दर०—अलमलम्। वेदमूढस्त्वं शास्त्रमधिकृत्य वदसि। अहं तु लोकव्यवहारं प्रकृतिनियमं चोद्दिश्याचरामि। पश्य—

दत्वा धान्यकणान्कृषीवल इमान् गृह्णाति तन्मूल्यजम्।
दत्वा वारि च वारिजाय जलधिर्गृह्णाति तच्छुक्तिजम्॥
पश्यैष प्रकृतेः क्रमोऽय विहितः क्षेत्रोद्भवस्येदृशः।
कस्मात्तेन पथेह नानुगमनं कार्यं सदा मानवैः॥२७॥

लावण्य०—[सविषादम्] अहो! प्रत्युत्पन्नमतिर्मे पिता। धनप्राप्तिविषये सत्यमसौ गहनदृष्टिः अथवा कोऽस्य दोषः। कस्मिंश्चिद्विषये संकीलिता दृष्टिरन्यत्र जड़ीभवेदिति प्रकृतेर्न्यायः।

जय०—शान्तिदास! मुञ्च मे हस्तमथवा मे हस्तलाघवं प्रेक्षिष्यते।

शान्ति०—विरमास्मात्संरंभादथवा मयाऽत्रैव महान् संरभः कृतः स्यात्।

लाव०—मातुल! अन्यस्मिन् बद्धभावायाममापरस्मै प्रदानेन कुतः फलम्। तस्मिन्मे पतिभावो नोत्पद्येत नवा पूज्यबुद्धिः।

सुन्दर०—[साश्चर्यं सक्रोधम्] रे कुलविनाशिनि। कतमस्मिंस्त्वयाऽनुरागो विहितः।

लाव०—मम हृदयवल्लभे मनोहरदासे। तस्यैव मे प्राणाजीवितं संसारश्चेति प्रतिज्ञातमेकदा भवतः समक्षम्।

सुन्दर०—स्मृतमुन्मत्ते! स्मृतं तदंशतःसर्वंमृतथापि न चलेयं पदमपि मे संकल्पात्। विपरीततां गतेऽपि सूर्याचन्द्रमसोरुदया-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

स्तक्रमे नान्यथा भवेन्मे निश्चयः । धावत धावत गणपत ! भीमजी ! पाडुरङ्ग ! दुराग्रहिणं ममैनं भ्रातरं मुष्ट्या जर्जरीकृत्य दूरीकुरुत । जयदास ! क्षणमात्रमप्यविलंब्य वक्रीभूतमानसामेनामाकृष्यानयात्र ।

[ते तथा कर्तुं प्रवर्तन्ते]

शान्ति०—दास्याः पुत्राः ! तिष्ठत तत्रैव । अथवा

यः स्पृशेत्कन्यकामेनामाकर्षुं वा प्रवर्तते ।
सत्कारं तस्य जानीयाद्वज्रमुष्ट्या ममैतया ॥१८॥

सुन्दर०—कथमेतेषामपि तर्जना ।

देवी०—श्वशूरवर्य ! कम्पेऽहमस्य वज्रमुष्ट्या रक्तनयनतीव्रदृष्टिपातैश्च । मुञ्च माम् न भवतोदुहितरं कामये । प्रयच्छ मे सुवर्णं वस्त्रालंकाराणि च ।

[उत्थातुमिच्छति]

सुन्दर०—जामातर् किमेतत् । समयभङ्गं विधातुं प्रक्रमाणो न लज्जसे ।

शान्ति०—जरठ ! पलायस्व द्रुततरं यावत्संदंशिकासदृशा मम हस्तेन धृतस्त्वं कन्यकास्थानेऽर्धचन्द्रप्रदानेन निष्कासितो न भवेत् । [उत्प्लुत्य हस्तेन गृह्णाति]

देवी०—मृतोऽहं मृतोऽहम् [कम्पते] देहि ममाभरणानि । प्रयच्छ मे सुवर्णम् [आक्रोशति]

सुन्दर०—गणपत ! मा तावन्मूढ इव तिष्ठ । जयदास । यावदेते प्रबाधकास्तावदानयनाम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

शान्ति०-एवं तर्हि पश्य-

[सहसा गणपतादय एनं प्रबाधन्ते तावत्समाक्रोशन्तीं प्राणांश्च मोक्तुं यतमानां प्रबाध्य समाकृषति जयदासः । शान्तिदासं आत्मानं मोक्तुं प्रयतते । किन्तु दृढं गृहीतो न शक्नोति ।]

सुन्दर०-जामातर् गृहाणैनां कन्यकामग्निं साक्षीकृत्य ।

देवी०-सुन्दरि ! गृह्णामि ते नवपल्लवसदृशं हस्तं यथा मूषकः सर्पं रज्जुं मत्वा गृह्णाति तथा । देवि ! परिपालयिष्ये त्वां यावज्जीवम् ।

लाव०-हा धिक् ! हा धिक् ! रे दुष्ट पिशाच दैवहतक ! धिक् त्वां मां च दुर्भागिनीम् [मूर्च्छति] ।

शान्ति०-[कथंकथमप्यागत्य] किमनुष्ठितम् । धनलोलुप कन्यामांसोपजीविन् पिशाच ! धिक् त्वां तुभ्यं च वृद्धवयसे कामीजनाय ।

उल्लुञ्च्य कलिकामेनां कूपे दुर्गन्धपूरिते ।
पातयता पातितः सत्यमात्मा तवैनया सह ॥१९॥

[सुन्दरो हसति वृद्धः स्मयते । शान्तिप्रसादः निश्वसति । लावण्यवतीं जागरयितुं प्रयतते]

इति ।

वृद्धलग्नं नाम प्रथमोऽङ्कः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

द्वितीयोऽङ्कः ।

[प्रविशति रत्नादिभिः खचितां चन्दनकाष्ठपेटिकां गृहीत्वा मञ्जरी ।]

मञ्जरी-[सुन्दरदासस्य गृहद्वारमागत्योच्चैर्वदति] लावण्यवति ! अरे ! लावण्यवति ! [प्रत्युत्तरमश्रुत्वा] कथं नास्ति प्रत्युत्तरः [पुनराह्वयति] लावण्यवति !

[गृहद्द्वारमुद्घाट्य मुखं दर्शयति सुन्दरदासस्य भगिनी दुःशीला]

दुःशीला—का त्वं मूढा कर्णविवरं खण्डशः कर्तुमुद्यता इव "काबेर" वत्समाक्रोशसि । अपेहि दुर्विनीते ! नैषा मत्स्यविपणिः ।

मञ्जरी—भगिनि दुःशीले ! आगताऽहं मे प्रियसखीं लावण्यवतीं द्रष्टुम् । मञ्जरी ते सहचरी वाराणस्या आगता सोत्कंठं त्वां द्रष्टुं प्रतिपालयतीति निवेद्यै नां प्रेषयितुं प्रसीदतु भवती ।

दुःशीला-ज्ञातम् । आगता त्वमेनां पिपथगामिनीमधिकं विपथं नेतुम् । जानीहि मूढे ! दुःशीला खल्वहम् । अपसरेतः स्थानादथवा केशेषु गृहीत्वा त्वां जर्जराकरिष्यामि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

मञ्जरी—भगिनि ! बलवदुत्कंठिताऽस्म्येनां द्रष्टुम् । नेषा मया द्रष्टोक्ता वाऽऽषण्मासेभ्यः ।

दुःशीला—[चन्दनपेटिकां दृष्ट्वा] अहो पेटिका ! सा च चन्दनकाष्ठमयी रत्नजडिता । [सलालसं निर्वर्ण्य] तर्कयामि तव सख्याः परिणयमुद्दीश्योपहारीकर्तुमानीतैषेति । यद्येवं तर्हि दीयतां मे । दास्ये यदा सा पतिगृहादत्रागच्छति ।

मंजरी—[साश्चर्यम्] कः पतिः कस्याः पतिः का च पतिगृहादागमिष्यति । अहं तावच्छावण्यवतीमुद्दिश्य पृच्छामि ।

दुःशीला—यदि न दातव्या यावत्साऽविधवा, तर्हि प्रतिपालय कानिचित्क्षणानि दिनानि वा । प्रेक्षिष्यसे यावत्त्वमेनां सौभाग्यचिह्नविरहितां मामिव विधवाभूतां तावद्देहि वैधव्योपहारमिति । [तर्जयन्ती निष्क्रान्ता]

मंजरी—तिष्ठ ! तिष्ठ ! गृहद्वारमास्फाल्य पतिगृहं गता । [विचारयति] लावण्यवती परिणीता । तस्याः पतिरपि मृत्युशय्यायां वर्तते सा च विधवा भविष्यति । अहो ! दैवहतक ! क एष वज्रपातः समुत्पातितः । [संभ्रान्ता] एषः स्वप्नः सत्यं वा [आत्मानमभितः प्रदेशं च निर्वर्णयति] एतत्समाकर्ण्य कीदृशीमवस्थां नीतो भवेदस्यां बद्धानुरागो मे भ्राता । अद्यैवागत्य प्रेषिताऽहमेनमुपहारमस्यै निवेदयितुं स्वानुरागाभिज्ञानमिति । अत्र त्वेवमुपस्थापितं दैवेन । दुःशीलया कदाचिन्नामोचितमनुष्ठितं भवेदिति मे शङ्का । तस्मात्सत्यवृत्तमज्ञात्वा नोचितं भ्रातरमुपस्रप्तुम् । [निष्क्रान्ता]

[इति प्रवेशकः]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

[ततः प्रविशति श्रेष्ठिकुन्दनदासस्य पुत्रको मनोहरदासः]

मनोहर०—अहो कीदृशी तन्नासीन्मोक्षपुरी । पुनः पुनः स्मरणपथमभिवर्तते ।

मंदाकिन्यास्तरलसलिलैः प्लाव्यमाने शरीरे ।
स्वेदाज्जाताङ्गमलसहितैः क्षाल्यमानैर्नु पापैः ॥
आनन्दो यो विमलमनसा तत्र देहेऽनुभूतः ।
कस्तत्तुल्यस्तदनुगुणतामावहेदत्र जातः ॥ १ ॥

अपि च ।

प्रातःकाले द्विजवरगणैर्घोष्यमाणैश्च वेदैः ।
देवस्थानात् श्रवणसुभगैः श्राव्यघण्टानिनादैः ॥
स्त्रीणां गीतैस्त्रिभुवनपतेः स्तोत्रमालाभिरामैः ।
प्राप्ताह्लादौ हृदयसुखदौ कुत्र कर्णौ रमेते ॥ २ ॥

अथवा हृदयानिहितां मे प्रियलावण्यवतीं मृगयित्वा दृष्टिविलोभनं करोमि कर्णसुखं चोत्पादयामि । यतः—

मंदाकिनीं मधुरवैः पदलीलया वा ।
दत्त्वाऽऽकृतिं जयति विश्वविधातरं सा ॥
तस्याश्च पुण्यविभवं नयनेन धृत्वा ।
तां सा पुनर्नु सृजती जयति द्विशस्तम् ॥ ३ ॥

कुत्र गतं भवेन्मे द्वितीयं हृदयम् । प्रेषिता मया भगिनी मंजरी । कथं चिरायतेऽनया । सुगन्धवृत्तरसास्वादलोलुपस्य ममानया नोद्भावितं प्रियाया वृत्तमद्यापि । अथवा कथं जानाति सा बराकी विरहव्यथितस्य मे हृदयदशाम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

स्पर्शं विनाऽग्रेन हि तत्स्वभावो।
ज्ञातः कथाभिर्विविधैः सुबोधैः॥
एवं स्थिते कस्य भवेन्नु शक्तिः।
ज्ञातुं दशां तां हृदयस्य गुप्ताम्॥ ४॥

कुत्र प्रतिपालयाम्येनाम् [इतस्ततः परिक्रम्यावलोक्य सहर्षम्] मंजरि ! [ततः प्रविशति मंजरी किंचिन्म्लानमुखी] कथं विलम्बितं त्वया। [मंजरी कथंकथमपि हसितुं प्रवर्तते] आः ज्ञातम्। एतावन्तं कालं प्रीतिक्षुधापीडितस्य मम स्नेहभाजनात्त्वया निःशेषकवलानि मुखे कृतानि। अयि स्वार्थरते ! द्रुततरमुद्गम मे भोजनं यावत्तव जठराग्निना न पच्यते। कथय सर्वकलाक्षेपम्। कतमदङ्ग त्वया समाश्लिष्टम्। कतमदङ्गे तस्याः पुलकः संजातः। कथं च तस्याः पक्ष्मणा निमीलितम्। कथ च तारकेण कोणान्तगतो भावो निवेदितः। कथं च तया स्मितस्मेराननया लज्जावरणेन मुखं समावृतम्] कथ च कपोलरक्ततयोदयगतो बालसूर्यो लज्जाभावं प्रेषितः। सुधां निर्झरन्त्या दन्तावल्या कथं धूतमोहिनी स्वरूपो विष्णुः क्षणं विवर्णभावं गमितः। [साश्चर्यं परावृत्य पृच्छति] कथं मूकमिव शब्दमपि न विमुञ्चति ते वागिन्द्रियम्। वद वद भगिनि ! त्वां दृष्ट्वा वेपितमस्याः श्वासनिर्भरेण हृदयेन वा न। कंपेनापूरिताऽखिलाङ्गयष्टिर्वा न। किं कृतं हस्तलतया। कीदृश्यश्च भूता अंसुल्यः। कथंभूता कटी। कथं च संजातो नितम्बः। नितम्बगामी केशकलापः किं कथयितुमारब्धो विस्रब्धमस्याः कर्णे। कथं च लोलायितं नयनतारकाभ्याम्। कथं न

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

वदसि । [चिबुकं संस्पृश्य पुनरेनां सोत्सुकं पृच्छति] हृदयगत-भावकथनोत्सुकाया आनन्दभारेण किं वाक्परिबाधिताऽऽसीत् ! अथवा मक्षिकावदनया किञ्चिदानम्रमूर्त्या गणगणितं किञ्चिन्मञ्जु-लमस्पष्टाक्षरम् अथवोद्धृतरसम् ।

मंजरी-बन्धो [गम्भीराननां क्षणं मूकीभूय] बन्धो ! कृष्णरात्रौ कुतो ज्योत्स्नाभिरामत्वम् ।

मनो०-कथं कृष्णरात्रिः । अद्य तु चन्द्रिकैवाभिरमते पूर्णे-न्दुना सह पूर्णिमायाम् ।

मंजरी-केतुबन्धोश्छाययाऽऽवृते नभसि तस्याप्यसंभवः ।

मनो०-[सावेगम्] किमेतत् । मम तव भ्रातुः प्रियोदन्त-श्रवणोत्सुकस्योपहासः ।

मंजरी-न मंजरी कदाप्युपहसति यथा दुर्दैवम् ।

मनो०-[सभयम्] कथं दुर्दैवमुपहसति । गता मे हृदय-वल्लभा पंचत्वं किम् । अथवा न खलु संक्रान्तः स्नेहभावोऽन्य-स्मिन् स्त्रीजनसहजहृदयदौर्बल्यात् ।

मंजरी-न तथा संभावनीयं निष्पापाया ईदृश्याः ।

चूतं वृक्षं परित्यज्य कोकिला कुत्र गच्छति ।
जलाशयाद्धि नान्यत्र रमते नलिनीमनः ॥ ५ ॥

मनोहर०-तर्हि किमापतितम् । कथय सत्वरम् । निर्बल-तरं संजातं मे मनस्तर्कावकाशकाङ्क्षं प्रतिपालयितुं न सहते ।

मंजरी०-नैष काल आवेगस्य । अस्या वराक्याः षष्ठितमे वर्षे वर्तमानः पितृव्यमदेवस्य पाशवर्त्मनि पतितः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

मनोहर–मंजरी ! किमुच्यते त्वया । कस्याः पतिमनुलक्ष्य वदसि ।

मंजरी०–समाश्वासिहि बन्धो ! तव वल्लभा लावण्यवती बलादुद्वाहिता ।

मनोहर०–[साश्चर्यं वज्रपातमनुभवन्] मम लावण्यवती अरे मम वल्लभतमा परिणीतपूर्वा । [सक्रोधम्] कथं केन कुत्र ।

मंजरी०–अस्याः पितुर्धनकोशमाकण्ठं कुर्वता जरठेन देवीदासेन ।

मनोहर०–[सोद्वेगम्] मञ्जरि ! मञ्जरि ! मम विडम्बनायाः कुतस्ते परितोषफलोद्गमः ।

मञ्जरी–मातुलेन पितुरादेशाद्बलान्नीयमाना रक्षार्थं युवकगणं समाक्रोशन्ती प्राणमोक्षं कर्तुमलब्धावकाशा निःसंज्ञैव हस्तं ग्राहिता ।

मनोहर०–बलाद्धस्तं ग्राहिता ! कुत्र गता अबलाजनरक्षिका देवताः । कुत्राऽऽसीद्वृद्धलग्ननिषेधकमण्डलस्य प्रमुखः शान्तिदासः । कन्यकां विक्रीयमाणां दृष्ट्वा न कस्यापि हृदयमुन्मथितम् ? अये निष्ठुर संसार ! अबलाजनरक्षणे तत्रैकोऽपि समर्थो युवको न जात इति कीदृक् ते पापफलं समुद्भूतम् ।

मंजरी–न्यायाधीशस्य प्रबाधपत्रकं सावकाशं प्राप्तुमसमर्थो लग्नविधिमुत्सादयितुमुद्युक्तः सुन्दरदासेन व्यापृतरक्षकैर्मृत्युमारं मारित एनां परिणीयमानां रक्षितुमसमर्थ आसीच्छान्तिदासः ।

मनोहर०–किं तथाऽनुष्ठितमनेन मामजरासंसेन । भो दुरात्मन् !

CC-0. Panini Kanya Maha Vidyalaya Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

पिशाचवृत्तिमनुतिष्ठता त्वया न चिन्तितं यथा क्षीरोदकेन संवर्ध्य क्षीयमाणाङ्गारसमूहे पातिता सुकुमारकलिकामाला । तिष्ठ तिष्ठ रे पिशाच ! कोमलाङ्ग्या रक्तं पिपासोस्ते जिह्वां मनोवृत्तिं हृदयरागं च तवाङ्गानि शतधा कृत्वा तथा शोषयिष्ये यथा न कोऽपि त्वादृशोऽन्यधनलोलुपस्तवानुकृतिं प्रतिपत्तुं चिन्तयेत् ।

गृहीत्वा कण्ठे त्वां गजपतिनिपातेन सहसा ।
विधूयोच्चैर्नीचैर्भुजबलनिबन्धेन विपुलम् ॥
विरूपो यावत्त्वं गलितरदचक्षुश्च न भवे- ।
श्चपेटां तावत्तेद्रुतमिह विधास्ये मुखबिले ॥ ६ ॥

अपि च

कन्यां तव प्रददतो जरठस्य गेहे ।
हस्तो न यो विधिवशाच्छतधा विदीर्णः ॥
तं खण्डशो दशशतं प्रविलुञ्च्य कुर्याम् ।
येनेतरः कलियुगे सदृशं न कुर्यात् ॥ ७ ॥

मञ्जरी०—भ्रातर् ! उचितो वाऽनुचितः समुदाचारो भवितव्यतयैवमनुष्ठितः । एवं च वर्तमान उद्दाम वृत्तिस्त्वं नगररक्षकैर्गृहकङ्कणं परिधापितः स्याः, न्यायनियमभङ्गानुष्ठानात्कदाचिद्दण्डबाधामप्यनुभवेः । कन्याविक्रायिणां चोपहासविषयं गच्छेः । तस्मात्समाह्रियतामावेगः ।

मनोहर०—नहि नहि संवेग एषः । अत्र तु सूचिभिन्नानि सर्वाण्यङ्गानि प्रतिमुखमङ्गारकैर्दह्यन्ते ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

जातं किं मम मन्दभागिन अहो ! यावन्न मे कल्पितम् ।
स्वप्ने यन्न गतं ममाक्षिविषयं जातं तदस्याः कथम् ॥
क्रोधादेवमिदं प्रतप्तहृदयं संक्षुभ्यते सर्वतः ।
शान्तं तन्नु भवेत्कथं यदधुना संताप्यते ज्वालया ॥८॥

तस्मादनुजानीहि मे गमनमथवा दूरारूढः कोपः सर्वनाशावहो भविष्यति ।

मंजरी–सुलभकोपः प्राकृतमानवः । सुविनीतस्तु संयताचित्तैर्भाव्यम् । अथवा विनीतानामविनीतानां को भेदः । पश्य–

वह्निना दुर्विनीतेन केवलं दह्यते जगत् ।
अनेनैव विनीतेन पश्येदं ध्रियते तथा ॥ ९ ॥

मनोहर०–भागिनि ! नानुभूयते त्वया या मर्मच्छेदिनी हृदयव्यथोत्पादिताऽतर्कितोपनिपातैर्दुर्दैवस्य । किं मया चिन्तितं किं चापतितम् । किं मयाऽपेक्षितं किं चोपलब्धम् । किं मया वाञ्छितं किं चानुभूतम् । कं भावं हृदये कृत्वोत्ताम्यता हृदयेनागतं कथं चासौ भावः संवृत्तः । आगामिकालस्य कीदृश्युज्वलताऽपेक्षिता कीदृशश्चानन्द उदीक्षितः कीदृशं च स्वर्गोत्तरसुखं निमीलितनयनेनाधन्येन मया कल्पितम् ।

इयं पुष्पश्रेणिर्मलयजसुगन्धं विदधती ।
समुद्भूतैर्भावैर्मधुपतनुभिः सा परिगता ॥
स्थिता कण्ठे देयादमृतजसुखं स्पर्शजनितम् ।
कथं धन्योऽन्यः स्यादिति कलयतो मे परिहृता ॥१०॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अपि च—

असारे संसारे विविधरसतां साऽनुजनयेत् ।
तथा कार्योत्साहं मृदुलवचनैः सोपविसृजेद् ॥
अहं चैवं तस्या अनुगणितभावं प्रगुणयन् ।
मृगाक्षीं कुर्यां तामिह सुफलितार्थां प्रमुदिताम् ॥११॥

अन्यच्च

कदा रेवातीरे तरलजलवातानुभवन् ।
लभेयानन्दं मे दयितजनसंगीतजनितम् ॥
कदा वीणावाद्यैर्नदकलरवैर्बृंहितमुखैः ।
पिबन्तौ कुर्यावो नयनजसुधां कालगमनम् ॥ १२ ॥

मंजरी—दैवं सर्वदाऽभिलषितं न संपादयति । कदाचित्तद्विपरीतसम्पादनेऽपि तस्य मनोरथः ।

मनोहर०—पश्य, पश्य, मंजरि ! विस्फारितनयनाभ्यां ते पश्य । एवं दैवमवलम्बमानस्य ममाखिलः संसारः प्रलयजलेन परिप्लुत इव दृश्यते । कीदृशः कालक्षेपः संसारे मया परिकल्पितः कथमसौ घटाच्छिद्रन्यायेन जलवन्निसृतः ।

मंजरी—अत एवैतद्दैवम् । तस्य बलवतो विधेर्विहितं प्रतिविधातुं कः प्रभवति ।

मनोहर०—केन सृष्टोऽसौ दुरात्मा विधिर्यः पुरुषार्थमुन्मूलयति विहस्य चाशाभिलाषामयं जीवनं सर्वतो ज्वलयति ।

न यावन्मे भावी फलकगतरेखाङ्कितकृतम् ।
मनः पिच्छं यावद्धृदयगतभावान् सुविदधत् ॥

Digitized By Siddhanta eGangotri Gyaan Kosha

Digitized By Siddhanta eGangotri Gyaan Kosha

सुवर्णैः सम्पूर्णं सफलकृति मुक्तं न च मया।
असौ तावत्क्षिप्ता विमतविधिना हन्त सहसा ॥ १३ ॥

अपि च

मृदुलमधुरभावासङ्गमत्रैव मुक्त्वा।
हृदयमपि कठोरं त्यक्तरागं करिष्ये ॥
प्रणयविषयमन्यं सर्वथा संप्रतोद्य।
प्रबलतमविधातुः क्रौर्यभावं हसिष्ये ॥१४॥

[नेपथ्ये कलकलः। पश्चाद्दुःशीला-हा धिक्! हा धिक्! खण्डितं मे भ्रातृदुहितुः सौभाग्यम्]

मञ्जरी-[संभ्रान्ता] हन्त! सोरस्ताडनमाक्रन्दते दुःशीला लावण्यवत्याः पितृष्वसा। दुर्दैवं खलु संजातमिति तर्कयामि। अनुयाहि माम्। सा वराकी खलु समाश्वासनीया।

[नेपथ्ये पुनः कलकलः]

लावण्यवती-[नेपथ्ये] अत्याहितमत्याहितम्। क्रूरः खलु लोको मे कङ्कणभङ्गं कर्तुं समुद्यतः। त्रायतां मां कोऽपि युवकजनोऽस्माद्दुराचारात्। अहो न कोऽप्यबलाजनरक्षक आभिरमङ्गललब्धानन्दाभिर्दुष्टाभिः संबाध्यमानाया मे रक्षणे समुद्यतः।

मनोहर०-आः किमेतत्। का दुरात्मानोऽतर्क्यदुःखार्णवे वर्तमानायाः कन्यकाया आर्तस्वरतां हृदयपीडनादुद्भावयन्ति। रे मूढाः! न जानीथ यथा—

संयातः खलु कालरात्रिसमयः स्त्रीदुर्दशाकारकः।
यस्मिंस्त्रीजनदास्यभावविपुले पुंभिः कुकर्मारतैः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दुष्टाभिः प्रमदाभिरप्रतिहतैरासुर्यमाचेष्टितम् ।
संसारो नरकाददूरपतितं स्थानं सदा प्रापितः ॥ १५ ॥

मंजरी—बन्धो किं वचनोत्सर्गेण । यद्येवमेव तव हृदये तत्त्वतो वर्तते तर्ह्येष एव कालोऽज्ञानकूपपतितानां जनानां रूढिभङ्गक्रममुपस्थापयितुम् । असौ तु कन्या वृद्धं बलात्परिणायिता । असौ च परिणयादूर्ध्वमकालक्षेपं पञ्चत्वं गतः । स्त्रीजनश्चैनां दुःखार्तां पीडयति । अतः कोऽन्योऽवसरः प्रत्यक्षदृष्टांतेन नवरूढिनचारकरो युक्तः ।

मनोहर०—शान्तिदासं सर्वं निवेद्य न्यायसहायं यथाशक्ति त्वरितं संप्राप्य सत्वरमेहि ।—तावत्कालमहम्—

रूढिमूलान्यथोन्मूल्य चूर्णीकृत्य तथैव च ।
पंचाग्नौ च क्षेप्स्यामि लोकस्यामुष्य पश्यतः ॥ १६ ॥

[निष्क्रान्ते]

इति ।

हृदयसंतापाख्यो द्वितीयोऽङ्कः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

तृतीयोऽङ्कः ।

[ततः प्रविशन्ति दुःशीलादयस्त्रियो लावण्यवतीं परिवेष्ट्य तस्याः कङ्कणं भंक्तुमुद्यताः । लावण्यवती तथा कर्तुं नानुजानाति]

लावण्य०–[समाक्रोशन्ती तर्जयन्ती च] मुञ्चत मुञ्चत मे हस्तौ ।

एका–अयि मूर्खे ! पश्य ते पितृष्वसारम् । कियताऽन्तर्दुःखेनैषा परिपीड्यते । रुधिरपरिदिग्धमुरः सा पुनः पुनस्ताडयति । त्वं तु मूढेवोन्मत्तेवाऽभार्येव कथमेवं तिष्ठसि ।

दुःशीला–हा धिक् ! हा धिक् [सोरस्ताडनं रोदिति] रे दुष्टविधे ! प्रियभ्रातृदुहितरं विधवां कुर्वता त्वया कथमहं न मारिता । अहमेवाधुना प्राणमोक्षं करिष्ये । यत एवं भूताया भ्रातृदुहितुर्मुखं द्रष्टुं न शक्ष्यामि । [कण्ठपाशं कर्तुमुद्युक्ता]

अपरा–अरे गृहाणैनाम् ! अतीवदुःखावेगेनोह्यमाना कदाचिन्मृत्युमकालं समाश्लेक्ष्यति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अन्या–हन्त ! देवरपत्नीभूताया अस्या उन्मत्तायाः साम्राज्ये कथमेषा वराकी जीवनकालं नेष्यति । [रोदिति]

अपरा०–सखि ! त्वं निराधारा संजाता । समाश्वसिहि । समाश्वसिहि । त्वां रुदतीं दृष्ट्वा ममाऽपि नयनेऽश्रुप्लुते भवतः ।

[नयनाश्रूणि प्रमार्ष्टि]

इतरा–पश्य पश्य । ज्येष्ठपत्नी प्राणत्यागं कर्तुमिच्छति हृदयद्रावकं च रुदनं करोति तथापि वज्रीभूतहृदयैषा विधवाभूताऽप्यानन्दमुपभुञ्जाना नयनादेकमप्यश्रु न मुञ्चति । अहो ! कलियुगेन कलुषितः खलु संसारः ।

दुःशीला–वाहय वाहय मां चितास्थानं मे देवरस्य, पातय मामग्नौ । न क्षमेऽहमस्मत्कुलोचितसंस्काररीतीनामुच्छेदमनया विधवाभूतया क्रियमाणं द्रष्टुम् । रे स्त्रीजन ! देहि मे छुरिकां वाऽऽनय विषभाजनं येनात्मोत्सर्गं कृत्वैनां सन्तोषयामि ।

एका–रे वधु ! कथं त्वं दुःखार्तामेनां वराकीं श्वश्रूस्थाने स्थितां ते ज्येष्ठजायां दुःखयसि । त्यज कुजनोचितं वर्तनम् । चतुरे ! आनय पाषाणमस्याः कङ्कणभङ्गाय ।

लावण्य०–[सक्रोधम्] अपेहि । न मे कङ्कणस्पर्शः कार्यः ।

अपरा०–कथं न कार्यः । विधवा खलु त्वं संजाता । ईदृश्याः केशवपनं कार्यं कङ्कणानि च भङ्क्तव्यानीति लोकरीतिः कुलरूढिः शास्त्राज्ञा च ।

इतरा–किमनया लौकिकविमुखया शास्त्रेण रीत्या नीत्या वा । एषा तु श्वएव पुनर्विवाहमनुष्ठास्यति । तदनु येन केन

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

प्रकारेण परिणीतं च हत्वाऽन्यं जनमन्वेष्यति तं च हत्वाऽपरमित्यनेकान् नरान् परिणीय हत्वा च कुलटावृत्तिमनुवर्त्स्यति ।

लावण्य०—विरम जिह्वाचाञ्चल्यात् । न क्षमिष्ये शब्दमप्येकमतः परं मे सद्वृत्तिबाधकम् ।

दुःशीला—प्रहर मां रे कुलोत्सादिनि । अमङ्गलपदया त्वया लग्नकाल एव तथाऽमङ्गलं रुदितं यथा मृतो मे युवावस्थोऽपि देवरः । मारय मामप्यधुना कामरुदेशीयप्रयोगेण । पिब पिब मे रुधिरं किन्तु मां मा शोषय पिशाचवृत्त्या ।

[मस्तकं पाषाणेन ताडयति]

एका—रे मन्दभागिनि ! त्रूट्यतेऽस्या हृदयेन । मा विलम्बस्व । आनय ते हस्तम् । स्वयमेवाहं ते कङ्कणानि भंक्ष्यामि ।

[तस्या हस्तं ग्रहीतुमिच्छति]

लावण्य०—मा कुरु स्पर्शं मे हस्तस्य कङ्कणस्य वा । यदि काऽपि मां स्पक्ष्यति तर्हि न जाने किं मया कृतं स्यात् [तर्जयति]

दुःशीला—[सक्रोधम्] रण्डे ! सौभाग्यं विनष्टं तथाऽपि तच्चिह्नं धारयितुमिच्छसि ।

लावण्य०—कस्याः सौभाग्यं विनष्टम् ! कथं च विनष्टम् । न मया पतिरित्येष संवृतः न च मया पतिरिति संभावितः । एवं स्थिते कस्याः पतिभावः कस्मिन् । पतिपत्नीनिबन्धको भावो यदि न विद्यते तर्हि तन्मूलकं दुःखं कथं दृश्यते । कथं च सौभाग्यनाशः ।

दुःशीला—यावत्स्वयं न दर्शयामि तावत्त्वं स्वच्छन्मदद्वुः वर्तसे किम् । [यष्टिं गृह्णाति]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

लावण्य०–दुःशीले ! नाऽहं ते दासी ।

दुःशीला- त्वं तु राजमहिषी । मम वृद्धप्रमाता । सुगन्धपुष्पैः पूर्णीया । एहि ते पादप्रक्षालनं करोमि ।

एका–मङ्गले ! यमुने ! यशोदे ! कथं शून्यमुख्यः पश्यंत्य इदं तिष्ठत । कैषा । गृह्णातैनाम् । अनिमेषमस्या कङ्कणानि भंक्ष्यामि चन्द्रकं च मार्क्ष्यामि नापितश्च लीलयैव केशवपनमनुष्ठास्यति ।

नापित–मा बिभीहि बालिके ! निपुणोऽहं केशवपने । एता सर्वा विधवाः केशमुण्डने ममैव हस्तलाघवं प्रशंसन्ति । भगिन्या मङ्गलायाः केशवपनसमये तथा निपुणतया मया क्षुरश्चालितो यथाऽनयैकोऽप्यश्रुबिन्दुर्न पातितो मया चारक्तपातं शिरोमुण्डितम् । एहि पश्य, कीदृशो मे तीक्ष्णतमः क्षुरः । [दर्शयति]

लावण्य०–अपसर पिशाच । अथवैकया लतया ते तुण्डं खण्डशः करिष्यामि ।

नापित–मा कुप्य । हृदयहारिणी वार्ता ते मनोरञ्जनम्–

लावण्य०–[इत्यर्धोक्त एनं प्रहरन्ती] चाण्डाल ! अपेहि, सत्वरमपेहि ।

मंगला–गृहाणैनां दुराचारप्रवृत्ताम् ।

[सर्वा लावण्यवती गृह्णन्ति सा चात्ममोक्षे प्रयतते ।]

लावण्य०–त्रायस्व ! त्रायस्व !

[ततः प्रविशति मनोहरदासः]

मनोहर०–तिष्ठत तिष्ठत [आगत्यैनां मोचयति] कोऽतिपात एष अनार्यजनसदृशः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दृष्ट्वा दूरत एव मांसशकलं काका डयेरन् द्रुतम्।
लुञ्चन्तः पतितं स्वचञ्चुभिरमुं कुर्वन्ति का का स्वरम्।
एवं प्राप्य सुभक्ष्यमेनमधुना यूयं कुकर्मारताः।
ज्ञातव्यं घनराजिभिर्न तु कदा छिद्येत विद्युल्लता ॥१॥

अपरंच-

संसारस्य महोदधेश्च तरणं ज्ञाताः स्त्रियः स्वामिभिः।
आख्याता व्यवहारविद्भिरितरैर्नारी गृहं मूर्तिमत् ॥
या भूता विषयः कवेः सुमथितश्चन्द्रोपि लज्जां गतः।
पश्याद्यैव रताः कुकर्मणि कथं धिक्कारयोग्या न ताः ॥२॥

एका-क एषोऽसत्कार्यविक्षेपकरः।

अन्या-प्राचीनरीतिरूढीनामुच्छेदकस्य कुन्दनदासस्य पुत्रो मनु इति लब्धनामाऽहं लोके। अनेनैषा परिणेतव्याऽऽसीत्।

लावण्य०-[सहर्षम्, ससंभ्रमम्, सोद्वेगम्] अये मम हृदयवल्लभो-मां-मां परिणीतां विधवाभूतां पश्यति। देवहतक किमिदमनुष्ठितम्। [मूर्च्छति] [मनोहर एनां हस्तेनावलम्बते].

मनोहर०-समाश्वसिहि लावण्यवति समाश्वसिहि। न जीवितुकामः कोऽपि त्वामङ्गुल्याऽपि निर्देक्ष्यति पश्येयमकृतकङ्कण-भङ्गेति। [सुवासितकर्पटशकलेन वायुं विदधाति]

दुःशीला-[समाक्रोशन्ती] त्रायस्व त्रायस्वैष कोऽपि मम देवरजायां स्पृष्ट्वाऽस्याः शीलं दूषयति।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

एका–[लावण्यवतीम्] निर्लज्जे ! परपुरुषस्पर्शं सुप्रकाशमङ्गीकुर्वती न निह्रेषि किम् । [एनां मनोहरात्समाकर्षुं यतते]

लावण्य०–[सहसा मनोहरमंसेनाश्रित्य] रक्ष ! रक्ष ! मनोहरदास ! स्त्रीसहजकेशकङ्कणचन्द्रकादिसौन्दर्यरहितां मां कर्तुमुद्यता एताः स्त्रियः ।

इतरा–पश्य पश्य रे लोका ! न केवलमनया कुलाचारोच्छेद कृतः किन्त्वधुना नीतिबन्धनान्यप्युसाद्यन्ते ।

अपरा–हा धिक् ! हा धिक् ! अद्य मृतोऽस्याः पतिरद्यैवात्रान्यः समालिङ्ग्यते कुटिलयाऽनया ।

मनोहर–सत्वरं समाहरत युष्मद्वचनम् । अथवा–

दुःशीला–अथवा किम् ! कथय कथय यदि शब्दमप्युच्चारयितुं ते शक्तिरस्ति । नैषा रङ्गभूमिः कुट्टिनीशाला वा यत्र स्थितस्त्वमेनां संस्पृश्य विटपात्रं नाटयसि । दूरमपसर ।

मनोहर–[तर्जयित्वा] रे चारित्र्यमस्या मम चाधिक्षेप्तुं प्रवृत्ता ।

नारीं नरं समं दृष्ट्वा शङ्का का क्रियते त्वया ।
संत्यज्य सुदृढं वृक्षं कमन्यमाश्रयेल्लता ॥ ३ ॥

अपि च न ज्ञायते छिद्रान्वेषिभिरमुष्मिन् संसारे । यथा–

पर्णं नलिन्याः सलिले निमग्नम् ।
छिन्नं न दृश्येत यदा विकृष्टम् ॥
चारित्र्यमीदृग्यदि पर्णभाजाम् ।
तत्कीदृशं स्यादथ चेतनानाम् ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अन्या–अहो ! पण्डितः खल्वागत उपदेष्टुम् ।

दुःशीला–नहि पण्डितः कुट्टिनीदूत एष एनां प्रलोभ्य कुट्टिनीशालां नेतुमागतः ।

मनोहर०–मम कुलप्रतिष्ठामपि दूषयितुं प्रवृत्ताः रे–

प्रतिवेशी–[प्रविश्य] मनोहर ! [हस्तेनैनं गृह्णाति] किमेतत् । न समुचितं तवैतासां कार्यविक्षेपमुत्पादयितुम् । स्त्रीजनकरणीयेषु न पुरुषबुद्धिप्रसरो योग्यः । गच्छ ते मार्गम् ।

मनोहर०–आगतोऽस्म्येनां रक्षितुं कुरीतिपिशाचिन्याश्च हस्ताद्विमोक्तुम् । लावण्यवति ! गच्छाग्रतः पश्येयं कस्ते पंथानमावृत्य तिष्ठति । [लावण्यवती चलति]

दुःशीला–कुजाते ! पदात्पदमपि न गन्तव्यंस्त्वया । गच्छसि चेन्नासिकाच्छेदं कृत्वा मुण्डितशीर्षां त्वां निष्कासिष्ये गृहात् ।

मनोहर–अहो ! ईदृशी ते गर्जना ! अहमपि तावत्पश्यामि कथमस्याः कङ्कणभङ्गादयोऽनुष्ठीयन्ते ।

दुशीला–करिष्ये करिष्ये तव पश्यतः करिष्ये कङ्कणभङ्गमस्याः; कारयिष्ये च केशवपनम् चतुरे ! गच्छ, आह्वयास्याः पितरम् । [ततः प्रविशति पुरोहितेनानुगम्यमानः सुन्दरदासः]

सुन्दर०–लावण्यवति ! किमेतत् । कथं कुप्यते दुःशीलया [मनोहरं दृष्ट्वा] आ आगतो मनोहरः ।

दुःशीला–सुन्दरदास ! त्वत एषा कुजाता जातेति कलंकितं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

ते कुलम् । मम देवरायैनां दत्वाऽस्य मृत्योरनन्तरमेनां विधवा-वेशमपरिधाप्य कथमस्मत्कुलं दूषयितुं प्रवृत्तः ।

सुन्दर०—रे पण्डिते ! कथं नानुवर्तसे ज्येष्ठजायाया आज्ञाम् ।

लावण्य०—न किञ्चिदप्यनुपालनीयं दृष्टमस्याः ।

सुन्दर०—मुञ्चैनं पुरुषम् । गच्छ गृहमध्यागारम् ।

[समाकृषति]

मनोहर०—महाशय ! यद्यमानुषभावं प्रतिपद्यैषा समाकृष्यते तर्हि मूर्धा ते शतधा भूत्वा भूमौ पतिष्यति ।

सुन्दर०—दूरमपसर कन्याप्रलोभक !

कन्यां प्रार्थयता त्वया निपतितं मत्पादयोः सन्मुखम् ।
थूत्कृत्यैव तदा मया च हसितं तत्किं त्वया विस्मृतम् ॥
विघ्नं कारयितुं त्वमद्य चलितो जानासि नो मे प्रभाम् ।
सत्यं यास्यसि लोहकङ्कणधृतो रक्षैः समालम्बितः ॥५॥

लावण्य०—मनोहरदास ! दुर्भाग्यगृहीतां मां त्यज परिरक्ष चात्मानं नो चेद्दुरात्मान एते तव दुर्दशयाऽऽनन्देयुः ।

मनोहर०—अहमपि पश्येयं कस्य गतिः केशवपनकङ्कण-भङ्गादिविचारविरुद्धायास्तवविरुद्धमाचरितुमस्मिन् प्रगतिशीलयुगे ।

सुन्दर०—मूर्ख ! न पतितं ते श्रुतिपथं यन्मयाऽनुष्ठितमस्या विवाहसमये ।

इह तव सदृशा ये मौर्ख्यमालम्बमानाः ।
अनुपदमुपयाता रक्षणायाय मत्ताः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

विहसितमदभावास्ते कृता नष्टयत्नाः।

घनशकलसमूहा वायुनेवावभग्नाः ॥ ६ ॥

मनोहर०—यद्येवं तर्ह्यन्यथैव विहितं तव भागधेयेनाद्य। न्यायेन परिरक्ष्यमाणेषा दुरात्मभिः समाघ्रातुमपि न शक्यते।

पुरोहित-युवक! शास्त्रोपहितं विधिमनुष्ठीयमानमुपहन्तुं न ते समुचितम्।

मनोहर०—एषा परिणीतेति स्थापयितुं केन शक्यते।

पुरोहित-साक्षीकृतोऽस्या लग्नविधिः।

मनोहर०-यद्येवं तर्हि मुक्तैषा पितुर्निग्रहात्। परिणयानन्तरं पतिनिग्रह एव स्त्रीणां विद्यते। असौ तु पतिर्मृतः। एवं सा स्वतंत्रा यथा न कोऽपि पुत्रोऽनयोर्जातो दृश्यते। तथा स्थिते क एनां यथेप्सितं कुर्वाणां निग्रहीतुं शक्नुयात्।

पुरोहित-ज्ञातिः।

मनोहर०—ज्ञातिरिति कश्चिज्जनसमुदायः। तेन च स्थापिता नियमाः समयानुसारिणो यथाकालं विक्रियेरन्।

दुःशीला—न जानात्येष मूढो यथा लग्नविधिना मनुष्यः स्वकुलपरंपरयागताः कुलधर्मरीतिनीतीः पालयितुं निबद्धः। तस्मादस्मत्कुलरीतिरनयाऽनुसर्तव्या।

मनोहर०—न तथा। लग्नमिति न पतिकुलक्रमागतरूढिपालनप्रतिज्ञा। न वासौ न्यायलेखः नवा विकारवृत्तेरुपशमनहेतुः। केवलं तत्स्नेहमूलो दीपोर्ध्वविकारहितः सुप्रभः। तस्मिंश्चाविखण्ड-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

माभास्यमाने संसारदुःखमोक्षप्रसङ्गः । एवं सति बलात्कारेण विधीयमानं लग्नं कथं लग्नं भवेत् । परिणीयमानाया अस्याः स्वयमनुच्चार्यमाणा लग्नप्रतिज्ञा कथं प्रतिज्ञा भवेत् । संसारमूलः स्नेहो नोत्पादनीयः स तु स्वयंभूः । यथा हि तत्र-

सूत्रस्य ग्रथनां विनाऽपि हृदयं बद्धं सदा दृश्यते ।
संक्राम्येत न यच्च दर्पणतले दृश्येत तद्बिम्बितम् ॥
यद्दीप्तं न विभास्यते हुतभुजा संदीप्यते तत्स्वयम् ।
स्थानं स्याद्विपणेः कथं नु विरलः स्नेहः स्वयंभूः सदा ॥७॥

पुरोहित—लग्नमिति कन्यायाः पित्रा वराय दीयमानं दानम् । तद्दत्तमदत्तं न भवति । एवं सति पुनर्विवाहस्यासंभवः । तस्माद्यथा विधवा विकारवशं गता न भवेत्तथा विधातव्यम् । सौन्दर्यं तु विकारोद्भावकम् । तस्मात्केशवपनादिनैनां विरूपां कृत्वाऽस्यै विकारविनाशकं भोजनं देयमिति शास्त्रविद्भिरुपस्थापितम् ।

मनोहर०—रे पण्डित ! इदृश्यः कियत्यः विधवा विषयं न गताः । विकारो न केवलं सौन्दर्यादाकृतेः सौष्ठवाद्वोद्भवति । इन्द्रिय-सुखप्राप्तिहेतुरेवास्य कारणम् । न च भोजनादि । वनवासिनामपि मुनीनां तत्संभवात् । यदुक्तं 'कन्याया दानमिति' अत्र तु दानमेव न संभवति । तस्य संभवे पुत्रस्यापि दानसंभवः । योनिभेदो न प्रबलकारणम् । दानप्रमाणेऽप्यङ्गीक्रियमाणे प्रदातुः प्रदानादूर्ध्वमधि-कारलोप एव । प्रतिग्रहीता मृत एव । प्रतिग्रहीतुराज्ञां विनाऽन्यस्य कस्यापि दानविषयोपरि [illegible] । एवमपि मुक्ता स्ववृत्ति-मनुसर्तुम् ।

Digitized By Siddhanta eGangotri Gyaan Kosha

पुरोहित—भवेत्तद्यदि वर्तेतानियतः संसार एषः । वर्तमानकाले शास्त्रमपि परित्यज्य लोकेनासंमतं, रूढेर्विरुद्धं, पण्डितैरननुमतं च न कदाप्यनुगन्तव्यम् । तथा चोक्तम् -

उन्मूलयेत्स्वकुलधर्ममिह प्रसूतम् ।
यो लोकरीतिमवधीरयते मनस्वी ॥
संसाररीतिपरिवर्तनयत्नशीलः ।
भ्रष्टः समापतति सोऽभिमुखं जनानाम् ॥ ८ ॥

मनोहर०—[संक्षुब्धः] कुलरीतिर्लोकाचारो लोकव्यवहारो रूढिरित्येवंघोषयन्तः स्वार्थरता मानवाः कियत्कालमवनतिकूपे पतितं भारतवर्षं लक्ष्यभ्रष्टप्राचीननियमैः स्वार्थपरायणैः स्ववृत्तिमनुसृत्य विद्वद्भिरितरजनैश्च विवर्ण्यमानैर्दूषयिष्यथ । न तत्वतः प्राचीनधर्मस्थापना क्रियते । न च नूतनः समालियते । न च वर्तमानकालयोग्यः प्राचीनधर्मः क्रियते । कुत्र वर्तते भवतः संस्कृतिर्मन्त्रतन्त्रादिज्ञानं निष्पक्षपातिनी न्यायबुद्धिश्च । पश्य बालविधवानां प्रमाणम् । क्षिप दृष्टिं सुगुप्तं क्रियमाणमनुमोद्यमानं च तथा व्यभिचारं प्रति । निरीक्षस्वेदृशस्य धनलोलुपस्य विक्रयबुद्धिं हृदयनिर्दयत्वं भावहीनत्वं च येन मृत्युदंष्ट्रायां वर्तमानाय जरठाय कन्या विक्रीताऽपरं चैषा मर्मभिद्भिः कुरूढिप्रहारैः पुनः पुनः प्रह्रियते ।

सुन्दर०—पुरोहित ! किमर्थं व्यर्थकालक्षेपः । विसृजैनम् । यदि स्वयं न गच्छति तर्हि नगररक्षकानाहूय । दुःशीलं यथोचितान् लोकाचाराननुवर्तस्व ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

लावण्य०—यदि वात्सल्यांशोऽपि वर्तते भवतो हृदये यदि वा जनसुलभसदयहृदयांशोऽपि विद्यते तर्हि विरमेदृशोऽनाचारात्। विचारमात्रेणाऽपि कम्पते मे हृदयं, कथ तत्सहिष्यत इदृशमनाचारम्। जनक मया भवान्न किञ्चिदपि याचितो जन्मनः प्रभृति। अद्यैव याचेऽहं, भिक्षेऽहं देहि मे मुक्तिमिति पादयो भवतःपतामि।

[जानुनी भूमौ निधाय पादयोः पतति]

सुन्दर०—रे दुष्टे ! पापविचारपूर्णेन ते मस्तकेन स्पृष्ट्वा मामपि मलिनीकरोषि। यदीदृशस्ते विचारस्तर्हि सहस्व मे लत्ताप्रहारम्। [लत्तया प्रहर्तुं पादमुद्धरति]

मनोहर०—[सहसैनंमभिहत्य] न लज्जसे लत्तयाप्रहरन् याचमानामेनां कुसुमपेलवाम्। पिता वा पिशाचो वा त्वम्।

कदा स्वान्मे गेहं मुखरितमपत्यैः सुकृतिभिः।
तथैवं संवृद्धैर्नयनसुखदैस्तैः सुविहितैः॥
यदा निःसंतानाः सुचिरमभिलाषेण मथिताः।
सुशीलां प्राप्यैनां त्वमभिरत एवं कथमहो॥ ९॥

अपि च—

अरे ! मे कन्याया नववयसि भूतं न किमिदम्।
न दृष्टं लब्धं वा क्षणमपि सुखं संसृतिभवम्॥
दशा का तस्याः स्यादनवगतसंसारविपदः।
तथा चिन्तास्थाने प्रचलसि कथं निर्घृणतरः॥१०॥

हताशां दृष्ट्वेमां रुचिरतनुसंस्काररहिताम्।
तथा मञ्जीराणामननुगतझंकारमधुराम्॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

*विना चन्द्रं रात्रीमिव सितमुखीं तां च विकृताम्।
कथं द्रक्ष्याम्येनामिति वहसि भावं न हि कथम् ॥११॥

सुन्दर०—पूर्वजन्मकृतानि पापान्यन्यजन्मनि फलान्याविष्कुर्वन्ति। अनया तु घोरं पापं पूर्वजन्मनि कृतं स्यात्तथेदृशः फलोद्गमोऽनिवार्यः। एवं सति वैधव्येनास्या मम हृदयपीडासंपादनात्को लाभः। स्वयमुत्पादितानर्थस्य नाऽन्यो भोक्ता लभ्यते।

मुग्धा शक्रनयेन गौतमवधूः शैल्यैव भूता च सा।
शक्रस्याप्यभवंस्तनौ दशशतं छिद्राणि शापादृषेः॥
यः पास्यत्यमृतं स एव लभते मृत्योर्विमुक्तिं तथा।
मृत्युं वा विषपो लभेत विषजं लब्धा न कोऽन्यो जनः ॥१२॥

लावण्य०—हन्त! पितैव ममैवं वदति [रोदिति]

मनोहर०—लावण्यवति! वत्सलता पशुजातिं समाश्रिता। अत्र तु बुद्धिमती मानवजातिरनुमानालिङ्गसपक्षविपक्षादीनां प्रमाणेनाभिलषितार्थस्य प्रतिपादने प्रवृत्ता। एहि भद्रे मम गृहमेहि।

स्वार्थान्धता मानवतां विहन्ति।
देवांशमुन्मूलयति प्रसूतम्।
एवं स्थिते का गणनाऽत्र कार्या।
प्रजा ममेयं जनकोऽहमस्याः ॥१३॥

---

* रात्रीः (रात्रिर्वा) चन्द्रं विना विकृता दृश्यते न तु सितमुखी। अत्र तु लावण्यवती चन्द्रं [इति चन्द्रकं] विनाऽपि सितमुखी। इति रात्र्या लावण्यवत्या हृदयदुःखमधिकमितिभावः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

सुन्दर०—तिष्ठ तिष्ठ । निर्लज्जायाः पन्था गृहीतस्तया तथापि प्रत्यानेष्ये त्वामेवमेव । [केशैर्गृहीत्वा ताडयति]

मनोहर०—मुञ्चैनाम्—

[मनोहरस्य मुष्टिः सुन्दरदासस्य शीर्षे पतति । पुरोहित इतस्ततो धावति । स्त्रियः कलकलमुद्घावयन्ति । इतरे जनाः समुपधावन्ति ।]

[ततः प्रविशति शान्तिदासः संरक्षको न्यायाधीशात्प्रबाधक-पत्रं गृहीत्वा ।]

शान्तिदास०—[उपसृत्य] मनोहर ! मुञ्चैनम् । लब्धं मया प्रबाधकमाज्ञापत्रं न्यायाधीशात् । यावदस्य वृत्तस्य न्यायो न्याय-सभायां न क्रियते तावत्सा मुक्ता यथेच्छं विहर्तुम् । [रक्षकः सुन्दरदासं पत्रं दर्शयति । स च सक्रोधं स्वहस्ताक्षरं ददाति ।]

लावण्यवती—पितृव्य ! रक्ष रक्ष माम् [पतति तस्य हस्तयोः]

शान्तिदास—पुत्रि ! रक्षिताऽसि दैवेन । पश्य—

विस्फार्य नेत्रे कुटिले सुरक्ते ।
दृष्ट्वा तथा चित्रगतः स्थितोऽसौ ॥
दन्तैरमर्षादधरं च दृष्ट्वा ।
मां त्वां च वक्राक्षिगतौ करोति ॥ १४ ॥

इति ।

कङ्कणभङ्गव्याघात इति तृतीयोऽङ्कः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

चतुर्थोऽङ्कः ।

[ततः प्रविशन्ति, काश्चित्स्त्रियोऽम्बिकाया देवायतन-समीपस्थं चत्वरं समाश्रित्य वार्तालापं कुर्वन्त्यः ।]

कामन्दकी-[चतुरिकां गच्छन्तीमाहूय] चतुरिके कथं पिहितनयना गच्छसि । ज्ञायते त्वं पतिसेवातत्परेति । एहि क्षणमात्रमत्र ।

चतुरिका-हला कामन्दकि ! अम्बिकायां वर्तमानाचित्तया मया न दृष्टाः क्षणं भवत्यः । कथय यत्कथनीयम् ।

दुरोदरा-पलायस्व पलायस्व । पतिस्ते न मृष्यति विलम्बम् । किं तव लावण्यवतीवृत्तांतेन ज्ञातेनाज्ञातेन वा ।

चतुरिका-सखि ! यावद्वयमज्ञातवैधव्यदुःखास्तावदेवैनां सदोषां पश्यामः । अज्ञातभर्तृसुखा सा विधवा जाता । तस्माद्यदि सा पुनर्विवाहं चिन्तयति तर्हि न किञ्चिदप्ययोग्यम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दुरोदरा—पुनर्विवाहं यदि बहु मन्यसे तर्हि परिणायय ते पुत्रीं विधवां कृत्वाऽन्यस्मै ।

चतुरिका—अज्ञातसंसारसुखाया एव पुनर्विवाहमनुजानामि न सर्वासाम् । यदि काचित्स्वयमेव पुनर्विवाहविरुद्धा तर्ह्यपि बलात्कारेणास्याः पुनर्विवाहः कार्य इति न कस्याचिन्मतम् । तथापि कस्मान्मां कुवचनैराधिक्षिपसि ।

कामन्दकी—समुचितमुक्तं भवत्या । तथाप्येनां विधवाम-कालक्षेपं कामोत्तेजकवचनोपन्यासेन स मनोहरः समुत्तेजयतीति न विनीतानां पन्थाः ।

दुरोदरा—असौ दुष्टो विधवाशीलभङ्गरतो रौरवनरके पतिष्यति ।

चतुरिका—अज्ञात्वा मनुष्यं न देयं मतम् । अनयोः प्रेम बाल्यकालादेव दृढबद्धमूलम् । तयोर्बाल्यकालान्महाधनकोशा-भिलाषिणा सुन्दरदासेनानयोः प्रणयो निःशब्दमनुमत आसीत् । यावच्छुल्कनिमित्ता सुन्दरदासस्य प्रार्थना मनोहरेण तिरस्कृता तावद्बलादेषा वराकी वृद्धत्वमापन्नाय देवीदासायाकस्मात्प्रदत्ता । अस्मिन्मृते यदि विधवाविवाहमेषाऽनुस्थास्यति तर्हि न दोषः ।

कामन्दकी—महाजनः किं विवाहमनुमंस्यते ।

चतुरिका—ईदृशस्त्वपवादरूपोऽनुमत एव । युवकजनबाहु-ल्याद्वृद्धैरपि शिथिलीकृतो विरोधोज्ञातिसंगठनार्थमपवाद एष इति ।

दुरोदरा—न कदापि सुन्दरदासोऽनुमंस्यते ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

चतुरिका—अनेनाऽपि संमानितो महाजनाभिप्रायः । अल्पै-रहोभिर्विवाहोऽनुष्ठितो भविष्यति ।

दुरोदरा—अधःपातः समीप एव ज्ञातेः । गत्वा ज्ञास्ये कथं वर्तते मे सखी दुःशीला [निष्क्रान्ता]

चतुरिका-एहि कामन्दकि ! आवामपि गत्वा वराकीं लावण्यवतीमभिनन्दावहे । [निष्क्रान्ते]

इति प्रवेशकः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

[ततः प्रविशति क्रोधरक्तनयनःसुन्दरदासः]

सुन्दर०—कथं कथं मयाऽनुमतो मे पुत्र्याः पुनर्विवाहः । सर्वे नष्टा मे प्रयत्नाः । मनोहर ! यावद्वैरनिर्यातनं न कृतं तावन्न कुतोऽपि शान्तिं लभेय । कुत अविर्भूतस्त्वादृशो दुरात्मा येन युवकगणान्प्रोत्साह्य वृद्धानपि समुत्तेज्य लब्धाऽपवादरूपिण्याज्ञा पुनर्विवाहस्य । न जाने किं कृतं स्यान्मया संदीप्तमनसा यद्येष दुरात्मा मे नयनपथमायातो विजने ।

अङ्गं तप्तं विकृतमनसा कार्यमूढेन दग्धम् ।
क्रोधाविष्टैरततनयनैरक्तकोणैर्विरक्तम् ॥
दष्टावोष्ठौ पुनरपि पुनः पीडितौ रक्तदिग्धौ ।
संमूढात्मा मम न लभते शान्तिमेवं प्रतप्तः ॥ १ ॥
क्रोधपूर्णं मनः सत्यं पन्थानं न हि पश्यति ।
येनास्मात्सा विरक्ता स्याद्दुष्टः सोऽपि च तां त्यजेत् ॥२॥

[संतप्त इतस्ततो भ्रमति]

[ततः प्रविशति दुःशीला]

दुःशीला—कथं सहेयास्याः पुनर्विवाहम् । केन कृतोऽनुज्ञात उपदिष्टो वा मे पुनर्विवाहः । किमहं नोत्पन्ना स्त्रीवर्गे । किं न संजाताऽहं विधवा । नाभिलाषा संसारसुखोपभोगस्य ममाऽपि किम् । यथा मयेदृशो दशाविपर्ययः सोढस्तथाऽनयाऽपि सोढव्यः । दुरोदरया सख्याऽप्येवमेव कथितम् । निश्चितं, सुनिश्चितं मया यथा मरिष्यामि किन्तु न मर्षयिष्यामि परिणयमस्या इति । कुत्र मे भ्राता । [पश्यतीस्तस्ततः] एष शून्यदृष्टिश्चलति । [निरीक्ष्य] अस्य क्रोधाग्नौ घृतसिञ्चनं तथा करिष्ये यथा प्रबलप्रलयवर्षा-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha
ऽप्येनं शामयितुं भग्नयत्ना भविष्यामि । [सुन्दरदासमुपसृत्य] सुन्दर ! कुत्र कर्तव्या विवाहसामग्री ।

सुन्दर०—[विचारग्रस्तः] यमद्वारे । अतः परं कुत्र योग्या मृत्युसामग्री ।

दुःशीला—भ्रातर् ! किमुच्यते मृत्युसामग्रो । कस्य ।

सुन्दर०—मनोहरस्य । कस्य वाऽन्यस्य ।

दुःशीला—[दन्तैरोष्ठौ निष्पीड्य] शान्तिं भजस्व । नोचितं मङ्गलकाले तथा वक्तुम् । आघोषितो विवाहः ।

सुन्दर०—तथैवाऽऽघोष्येत मृत्युः [निर्वर्ण्य]—दुःशीला—[विचार्य] कथं त्वमत्र—[इत्यर्धोक्ति]

दुःशीला—[सस्मितम्] बन्धो ! महाजनेनाऽपि दर्शितदया सा न पुनर्विधवायोगमर्हति ।

सुन्दर०—[ससंभ्रमम्] पुनर्विधवायोगम् । किं मयैतदुक्तम् । दुःशीले ! तव देवरस्य मृत्युना संतप्तं मे मनो न जानाति वाक्प्रसरम् । श्वो लावण्यवती मनोहरं परिणेष्यतीत्येष एव विचारो मे हृदयं ज्वलयति ।

दुःशीला—[भ्रुवौ निवध्य कर्णे] बन्धो ! दुःशीला खल्वहम् । न काचित्सामान्या ।

सुन्दर०—यद्येव तर्हि कुरु विवाहसामग्रीम् निमंत्रय ललनामङ्गलगीतानि गातुम् ।

दुःशीला—आज्ञापितस्त्वया घातकः ।

सुन्दर०—पुरोहितः ।

दुःशीला—मूढ ! मां वञ्चयितुमिच्छसि । न जानासि यथा

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

मां विना कोऽपि ते प्रयत्नो बन्धनागाराभिमुखः स्यात् ! न ते वैरनिर्यातनं भवेदस्य मनोहरस्य जीवितापहरणेन ।

सुन्दर०—तर्हि तत्कथमविलम्बितं स्यादिति सत्वरं कथय ।

दुःशीला—महान्तं वृक्षसंघातं पर्वतसमूहमपि च विदग्धुं समर्था विद्युत्केन बन्दिग्राहं ग्रहीतुं शक्यते । कस्मान्मेघात्सा विद्युत् पतितेति निश्चित्य ज्ञातुमसमर्थः कस्तां दण्डयितुं समर्थः ।

सुन्दर०—किमुपाक्षिप्तं भवत्या ।

दुःशीला—विहताशस्त्वं मे बन्धुरित्येव चिन्तितम् ।

सुन्दर०—किं लक्ष्यीकृतं भवत्या ।

दुःशीला—कीदृक् ते हृदयं पुरुषस्य स्त्रीजनस्य वा ।

सुन्दर०—जात्या पुरुषः पुरुषस्यैव मे हृदयम् ।

दुःशीला—[विहस्य] आकृत्या पुरुषस्तथापि हृदयं स्त्रीजनस्येति विचित्रा सृष्टिः ।

सुन्दर०—आज्ञापय । दुष्करमपि कर्म परिणतं तदेवक्षणं पश्यसि ।

दुःशीला—वर्तन्ते चतुराणकाः ।

सुन्दर०—बहवः, परन्तु किमेभिः ।

दुःशीला—जानासि त्वं विषणिपथम् ।

सुन्दर०—यथा सुन्दरोऽहमिति जानामि तथा ।

दुःशीला—आनय सोमलास्यं विषम् ।

सुन्दर०—विषम् । दुःशीले ! विषप्रयोगः—

दुःशीला—ज्ञातमेव यथा पुरुषा वाक्च्छूरा न तथा कर्मशूराः ।

सुन्दर०—कथमेतन्मनोहरे प्रयोक्तव्यमित्येव विचारणा मां पीडयति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दुःशीला–मूर्ख ! मनोहरे पञ्चत्वं गते कथं ते वैरनिर्यातनं भवेत् । अस्मिंस्तु म्रियमाणे तीव्रमर्मभेदिन्या पीडया च पीड्यमाने त्वयाऽनृण्यं यातं स्याद्वैरस्येति मन्ये । तस्मात्ते दुहितैव विषेण योजनीया ।

सुन्दर०–[विचार्य] लावण्यवत्यामेव विषप्रयोगः । पितैव पुत्रीघातको भवेत् ।

दुःशीला–घातकेन विषेण वा यदि मनोहरो हतः स्यात्तर्हि त्वयैवास्य मृत्युर्विहित इति पातालेऽप्याङ्गरक्षकैस्त्वं सप्रमाणं गृहीतः स्याः । अत्र त्वावामस्मद्गृहे तथा योजयिष्यावो यथा केनाऽपि त्वमात्तगन्धि न भवेः ।

सुन्दर०–वेपते मे हृदयं स्त्रीहत्याविचारेण ।

दुःशीला–कातर ! एकेनैव प्रयोगेण द्वावर्थौ साध्येते । प्रथमं तावदेषा विधवाविवाहजनितपापाद्बाध्यते । अपरं चास्यां मृतायां ज्वलितसंसारो मनोहरः प्रतिक्षणं शोकसागरे निमज्जन्नसह्यहृदयव्यथागृहीतः क्षणमपि शान्तिं न लभेत । तस्मात्स्थिरहृदयो भव । लग्नसमारंभेऽङ्गीकृते कन्यायां चालंकृतायां त्वयि च दर्शितोल्लासे को ज्ञास्यति केन किमनुष्ठितमिति । तर्कातिशयं हृदयं विह्वलीकरोति निश्चयं च शिथिलयति । तस्मान्मा देहि तर्काणामवकाशम् । गच्छामि तव लग्नोत्साहं निवेदयितुम् । त्वमप्यशिथिलितमना उत्साहं दर्शय । [निष्क्रान्ता]

सुन्दर०–[परिभ्रमन्विचार्य] तथैव करिष्ये । कस्मान्न करोमि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

द्वितीयस्मिल्लग्ने द्विगुणयितुमैच्छं मम धनम् ।
प्रतार्यैतान्मूढान्सुविहितनयेनैव बहुलम् ॥
पुनर्लग्नं पुत्र्या विमतमपि तन्मे त्वनुमतम् ।
विना किञ्चिच्छुल्कं तदिति मम संजातमसहम् ॥१॥

ज्वलति च ममात्मा । अङ्गानि दह्यन्ते । मनः संतप्यते क्षणमात्रमपि विलम्बं न सहे । कुत्र विषम् । कुत्र मे पुत्री । कुत्र गता च रात्रिः । दुष्ट दिनकर ! अद्यापि न मुञ्चसि नभस्तलम् । [कानिचित्पदानि गत्वा गवाक्षाभिमुखं] किमनुभूयते मया हृदये । कस्मादेतद्वेपते । दुष्कर्माणि रतोऽहमिति कोध्वनिरुद्भवति । किं दुष्कर्म । कथं चैतद्दुष्कर्म । पादेन ताडितः कुक्कुरोऽपि घुर्घुरायते । अग्निरपि हस्तेन निष्पीडितो दहति । तस्मान्नैतद्दुष्कर्म । वैरनिर्यातनमेव । यमदूत ! क्षणं कुरु विनिमयमावयोर्हृदययोः । एकं क्षणं तिमिरान्धकारेणावृणु मे नयने हृदयं विहायसं च । घटिकामेकां मे मनो विचारशून्यं कुरु । कानिचित्क्षणानि का सा कश्चाऽहं किमहं कर्तुमुद्यत इति प्रश्नान्मोद्भावय । पूरय मे हृदयं कठोरतया । अभितो मां पूरय सृष्टिं घोरताप्रेरकवायुना । प्रेरयोल्कादीनां चीत्कारं मामुत्साहयितुम् । [चलन्] कुत्र मध्यरात्रिं प्रतिपालयामि । लोकेषु व्यवहारन्मन्दोत्साहो भवेयम् । [विचारयन्] किं कुर्यामेतावत्कालम् । वाचयामि घोरकर्मविषयाणि पुस्तकानि । स्ववल्लभं द्रष्टुं गताया लावण्यवत्या मुखं कथमपि तावत्कालं न द्रक्ष्यामि । [पुस्तकानि विलोकयितुं प्रवृत्तः]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दृश्यम् द्वितीयम् ।

[ततः प्रविशतो मलयगिरिभूभागं वर्तमानौ लावण्यवतीमनोहरौ]

मनोहर०—[लावण्यवतीं प्रकृतिरमणं दर्शयन्] प्रिये ! पश्य संध्याभिरामत्वम् ।

गतप्रायः सूर्यो गगनतलकण्ठाद्रुतपदः ।
मुखेनारक्तेनामलकमलिनीं चुम्बितुमनाः ॥
अहो काश्मीराक्तं जलधिमवगाह्य प्रमुदितः ।
प्रियामालिङ्गेत्स्वां गतहृदयचिन्तो नतमुखाम् ॥ ३ ॥

अपि च

प्रियं यातं दृष्ट्वा त्वरितगमना सेर्ष्यहृदया ।
सपत्न्याः सौभाग्यं क्षणमपि न सोढुं स्थितवती ॥
तथा निर्गच्छन्त्या गलितपदरागेण चपलम् ।
मुलिप्तं संध्यायाः प्रतिपदमयं नु गगनम् ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अपरं चेतरदिग्विभागे ।

क्षिप्रं क्षिप्रं धनतिमिरजाः स्रंपतन्त्यत्र रेखाः ।
दृष्ट्वा सूर्यं त्वरितगतिकं सागरान्तः पतन्तम् ॥
तेजोध्वान्तं गगमतुलया तोलयत्यत्र दैवम् ।
स्तोकं तेजस्तदपि चपलं यात्यधस्ताद्विचित्रम् ॥ ५ ॥

लावण्यवती०–अथात्राऽपि पश्य ।

यावन्मग्नः पयसि तरणिस्तावदुत्क्षिप्तमम्बु ।
प्रक्षिप्ताये जललवकणास्तेऽत्र लग्नास्तमिस्रे ॥
कृत्वा नेत्रे विविधशतके मार्गणार्थं रिपूणाम् ।
रात्रिर्दृष्टिं क्षिपति सततं संवदन्त्यत्र लोकाः ॥ ६ ॥

मनोहर०–वल्लभे ! कीदृशी मुम्बापुरी दृश्यते ।

लावण्यवती–[परावृत्य पश्यन्ती] जाने खलु प्रियमभिसर्पन्त्याविह्वलाया रजन्याउपवस्त्रं सुवर्णरेखाबिन्दुभिरलंकृतं च्युतमिति।

मनोहर०–भवेत्तदपि । मम त्वेवं भाति ।

दृष्ट्वा दीपसमूहयुक्तशकलं पृथ्व्यास्तमिस्रावृतम् ।
तेजोभासमथैव तत्र विहितं क्षीणैश्च दीपैर्युतम् ॥
गंगा व्योमगतां तथाऽत्र विहितां सौन्दर्यमातन्वतीम् ।
मन्येऽहं रजनीमरीचिसमरे खण्डो दिवः पातितः ॥७॥

लावण्यवती–मनोहर ! सुवर्णाभिरामा संध्या कालरात्र्या संपूर्णं ग्रस्तेति वेपते मे हृदयम् । कदाचिदेषा मामपि ग्रसितुं हस्तं प्रसारयेत् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

मनोहर०—भीरु ! कुतस्ते भयमधुना ।

कालो गतः सुचरिते भयमादधानः ।

वात्सल्यभावमधुरं स्मयते विधाता ॥

विच्छेद्य मेघशकलान्निजरश्मिपातैः ।

कण्डूयते हरितकानि यथा मरीचि ॥ ८ ॥

अपि च—

प्रभाते संजाते रविकिरणपातैर्धवलिते ।

प्रकृत्याः संगीते विहगगणकण्ठेन कलिते ॥

समक्षं मित्राणां सदयहृदयानां तनुभृताम् ।

ग्रहीष्ये सानन्दं तव करमहं कङ्कणयुतम् ॥ ९ ॥

लावण्य०—[किञ्चित् स्मितस्मेराननना] वल्लभ ! उत्ताम्यति मे हृदयम् । हृदयभावं निवेदयितुं जिह्वाऽपि मे न चलति ।

मनोहर०—तव नयनात्क्षरत्यमृतम् । निःशब्दा ते वागधिकतरं स्नेहमाविष्करोति । प्रिये ! षष्ठिघटिकासु व्यतीतासु किं किं सुखं तव निर्मलहृदयान्न लभेय ।

लावण्यवती—[सलज्जं हस्तेनांशुकपल्लवं परामृश्य नतनयना] एकेनैव ते दृष्टिपातेन हृतसर्वस्वाऽहं किमपि दातुमसमर्था ।

मनोहर०—अक्षयपात्रं ललनाहृदयम् । प्रतिक्षणं नूतन सुकुमारभावप्रसादं जनयति । वदनाविष्कृतभावेन च तदेवास्वादयति ।

बीजस्कंधफलं विनाऽपि रसजं स्वादामृतं लभ्यते ।

यस्मिन् विस्मृतदुःखभावनिखिलं संतुष्टमेतज्जगत् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

संतापो हिमशैलशीतलतया नेतुं न यः शक्यते ।
स्वादेनास्य रसस्य तत्क्षणमसौ नीयेत शान्तिप्रदम् ॥१०॥

लावण्य०-रसेन्द्रेण त्वया रसवर्षया महेन्द्रोऽपि जीयते ।

मनोहर०-अहो ! त्रैलोक्यनाथः संवृत्तोऽहम् ।

लावण्य०-मम तु त्वं हृदयवेदिकायां स्थापितः परमात्मा । मम दृष्टिक्षेत्रे मनोभूमौ प्रकृतौ च त्वं सततं लब्धप्रसरः । दूरस्थितोऽपि समीप एव ।

मनोहर०-धन्योऽस्मि [घटिकायन्त्रेण दूरे घटिका वाद्यते] अहो व्यतीतो दीर्घकालः ।

लावण्य०-प्रियसमागमेऽखिलोऽपि युगः क्षणसमः । सेर्ष्यैषा घटिका न सहतेऽस्मत्सुखयोगम् ।

मनोहर०-नैषा तत्रोपालम्भस्थानम् । अनयातु उपकृतावावाम् । यथा—

रसास्वादे कियान् नौ कालो व्यपगत स्तद् ज्ञायते न हि ।
स्मारयत्येष अधुना तस्मात्कुर्वो यद्यथोचितम् ॥ ११ ॥

तस्माद्गृहं गत्वा प्रभातकरणीयेषु दत्तावधाना भव ।

लावण्यवती-गृहाभिमुखं गच्छन्त्याः पदानि मे स्खलन्ति किञ्चिदज्ञातमिव वर्तते मे हृदये दुःसहमारम् । कथमेनां दीर्घरात्रिं नेतुं शक्नुयाम् ।

मनोहर०-एष भूतकालवृत्तस्य परिणामः । विस्मृत्य सर्वं पितरं च संमान्य प्रतिपालय प्रभातकालम् । एहि गच्छावः कदाचित् पितृष्वसाऽपि त्वां प्रतिचक्षमाना प्रेक्षते ।

[निष्क्रान्ते]

CC-0. In Public Domain. Gurukul Kangri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दृश्यं तृतीयम् ।

सुन्दर०—(पुस्तकं क्षिप्त्वा) कदा भवेन्मे हृदयमीदृशम् । मीरा भत्रैव विषं पायिता । कृष्णाकुमारी मात्रा पित्रा च हालाहलं दत्ता । अपि च श्रूयते यथा क्षीरसागरसमुद्भूत भयङ्करहालाहलं शंकराय देवैर्दत्तम् अनेन च पीयमानमस्य प्रिययाऽम्बिकया विना संक्षोभं यावत्कण्ठपर्यन्तं गतं तावद्रष्टम् । [इतस्ततश्चलति] हस्तौ वज्रीभवताम् । आगता रात्रिः । यद्येषा स्वयं न पिबति तर्हि कण्ठेन गृहीत्वाऽनामेतत्पाययन्तौ मा भैष्टम् ।

[प्रविशति दुःशीला]

दुःशीला—(स्मयमाना तमनिमीलितनयना पश्यन्ती, गृहीतोमत्स्यो बडिशेन (उपसर्पति) ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

सुन्दर०–[आकाशं प्रति दृष्टिक्षेपं कृत्वा] कथं स्थिरीभूता रात्रिः । [घटिकायंत्रं दृष्ट्वा] कियतः कालादेतद्यन्त्रं दशमीमेव घटिकां दर्शयति । रे मूढ़ ! द्रुततरं मध्यरात्रिं समानयाथवा ते यन्त्रविभागान्पृथक् पृथक् कृत्वा तवास्तित्वं विफलं करिष्ये ।

दुःशीला–[घटिकायन्त्रं प्रहरन्तमेनं हस्तेन गृहीत्वा] बन्धो ! नूनन्त्वं पुरुष एव । सज्जीभव आगच्छति ते दुहिता ।

सुन्दर०–कुत्र वर्तते विषम् ।

दुःशीला–[सक्रोधम्] कथयामि दुहिता तेऽत्रागच्छतीति । वर्तते चानया सह मनोहरः । मा दर्शय हृदयगतविचाररेखां मुखतलभागे । स्मितं कुरु । चकित इव मा तिष्ठ । स्पृशैनां मस्तके । तां च समाजिघ्र । देहि मधुरवचनयुक्तामाशिषम् । गद्गदकण्ठेनोच्चारय वत्सलभावभिश्राणि वचनानि । कञ्चित्कालं सुमधुरवार्तालापेनैनां चकोरामनुरञ्ज्य । मा देहि स्थानं शङ्कालवस्याप्येतयोर्हृदये ।

[प्रविशति सलावण्यवतीकः मनोहरः]

[मनोहरमुद्दिश्य सास्मितम्] गृहीतभोजनरसो दृश्यते भवान् । लावण्यवति ! देहि ते स्वामिने तव करेण रसमयं ताम्बुलम् । जामातर् ! न खलु किंचिद्भवतो न्यूनमस्मत्तः ।

मनोहर०–सानुकूले विधौ सर्वमप्यनुकूलं संतोषावहं च परिणमति। तत्राऽपि व्यवहारकुशलायां भवत्यां कथं न्यूनतायाः संभवः ।

दुःशीला–बन्धो ! न ज्ञातमस्माभिः पूर्वं यथा मनोहरदास इति कश्चिन्मानवविशेषो येन कृतः सम्बन्धोऽस्मत्कुलप्रतिष्ठां प्रगुणयेत् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

लावण्य०–[स्वगतम्] कम्पते मे हृदयमस्याः शर्करासदृशवचनैः ।

दुःशीला०–गच्छतु भवान् । प्रभातं सोत्कण्ठं प्रतीक्षस्व । उषैव प्रत्युद्गता भवन्तमभिनन्दिष्यति । [स्मयते]

लावण्य०–[स्वगतम्] अस्याः स्मितं कथं न मे रोचते ।

दुःशीला०–अतिकार्यव्यग्रत्वात्पिता ते परिश्रान्तः । तस्मात्त्वमेव स्वामिनं दर्शय द्वारपर्यन्तं मार्गम् । श्वस्तः प्रतिपदं त्वयाऽस्यैव सेवाऽऽदरणीया ।

[गच्छति लावण्यवती स्वामिना सह द्वारपर्यन्तम्]

दुःशीला०–[कर्णे सुन्दरदासम्] सुन्दर ! कथं मूढ इवस्थितः । न दृष्टं त्वया तीक्ष्णदृष्टिरासीन्मनोहरस्त्वयीति ।

सुन्दर०–एनं दग्धुं प्रवृत्ते नयने कथं कथमपि मया निवारिते । न क्षमेऽहं कालक्षेपम् । कुत्र लावण्यवती ।

लावण्य०–[आगत्य] इयमस्मि तात ! वस्त्राभरणानि मयाऽपनेतव्यानीत्यहम्–

सुन्दर०–[तर्जयन्] नापनेतव्यानि । एभिरेव त्वयाऽत्र चिरं सुचिरं निद्रा कार्या ।

दुःशीला–बन्धो ! किमुपालम्भेन । एहि भूमिगृहम् । श्वो मङ्गलकार्यं भविष्यतीति मया नूतनानि सुवर्णरत्नमयान्याभरणानि लग्नसमययोग्यानि वस्त्राणि च निधिनिहितान्यस्यै देयानि । लावण्यवति ! त्वमप्येहि । स्वयमेव संवृणु । एतानि सर्वथाऽयोग्यानि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

सुन्दर०—किमर्थम्—

दुःशीला—नैतत्पुरुषकार्यम् । प्रथमं लग्नमुद्वेगकरं संवृत्तमिति द्वितीयमानन्दप्रदं परिणामयितव्यम् । लावण्यवति ! सन्ति बह्व्यः कञ्चुलिकास्तत्राभरणानि च ते मातुः । का कञ्चुकी तवोरसा संगता भवेदिति स्वयमेव पश्य ।

लावण्य०—[स्वगतम्] न जाने किमेताभ्यां प्रवृत्तम् ।

क्रोधाक्ते नयने पितुर्यमिमं भावं सुवाते क्षणम् ।
निह्नोतुं तमगम्यमेनमधुना शब्दैरसौ व्यापृता ॥
मध्ये वाचमसौ भिनत्ति सहसा कृत्वार्थलुप्तां तथा ।
साकूतं स्मयते मुखेन मधुरं तिर्यक्क्षणं प्रेक्ष्य माम् ॥१२॥

अथवा काऽत्र शङ्का कार्या । गर्जन्तो मेघा न वर्षन्ति । ऐकामेव रात्रिं कथं कथमपनेष्यामि ।

दुःशीला—एहि भ्रातृजे । कालो वृथा क्षीयते । प्रभाते बहुकरणीयं वर्तते । महति प्रत्युषसि चोत्थातव्यम् । एहि

[सर्वे परिक्रामन्ति भूमिगृहं प्रविशन्ति]

लावण्य०—[साश्चर्यं स्वगतम्] कथं द्वारौ पिदधाति । बहिर्गन्तुं शक्तुयां न वेति शङ्कते मे मनः ।

स्थितैवं स्थानेऽस्मिन्यमगृहसमे शाश्वतभये ।
तथा दृष्ट्वा तातं यमशतभयं संप्रददतम् ॥
समाक्रोष्टुं जिह्वा न हि चलति भीत्या प्रमथिता ।
न जाने यत्किञ्चिद्भवति हृदये मे किमिव तत् ॥१३॥

सुन्दर०—[गर्जन्निव] किं विचार्यते । उपविशात्रासने ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दुःशीला–भ्रातृजे ! पिता ते यच्छति तुभ्यमन्तिममृत-रसम् प्राग्वस्त्रादिसंवरणादास्वादयैतत् ।

सुन्दर०–[सगर्वम्] नहि नह्येदममृतम् । हालाहलं विषमेतत् ।

लावण्य०–[सभय सक्रोधम्] किं विषं पाययितुमहमत्रा-ऽऽनीताऽलंकारादिसंवरणमिषेण ।

दुःशीला- भूमिगृहं त्वमानीता यथा न कोऽपि तवाक्रोशं श्रोष्यति । अत्र वाऽऽगन्तुं शक्ष्यति ।

सुन्दर०–[विषपात्र दर्शयन्] एतत्ते पुनर्लग्नम् । एतत्ते वल्लभः । एतत्ते संसारः । तव सर्वा अभिलाषा अस्मिन्नेव परिसमाप्ता इति मोदस्व ।

लावण्य०–तात ! कथय ! किं मया भवतोऽपराद्धं यथैवं प्रवृत्तो भवान् ।

सुन्दर०–प्रथमलग्ने तावत्त्वयेदृशः संक्षोभः कृतो यथा ज्ञातिजनसमक्षमहं मूर्खः स्थापितः । पत्यौ च ते मृते त्वया तथा-ऽऽचरितं यथा न्यायाधीशेनाप्यात्तगन्धि लज्जास्पदं नीतः । ममेच्छा-विरुद्धं त्वया पुनः स युवकः संवृतो येन निन्दायाः परिसीमां प्रापितोऽहम् । महाजनोऽप्यनेन स्वमतानुसारीकृतोऽनुनीतश्च यथाऽत्राऽपि पुनर्विवाहे ममेच्छाविरुद्धमेव करणीयमापतितम् । एवं स्थिते त्वया विषं पातव्यं मया च वैरनिर्यातनं कर्तव्यम् ।

लावण्य०–तात ! कथं संभवति पितुः पुत्र्या सह वैरम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

सुन्दर०—यथा संभवत्यन्यजनेन तथा। यदि त्वं मे संततिः स्यास्तर्हि न कदापि मम हृदयविरुद्धमाचरितुं प्रावर्तिष्यथाः। त्वया तु तथाऽनुष्ठितं तस्मादहमेवमाचरामीति को दोषः।

दुःशीला—बाले! कस्य जनस्य प्राणरक्षां कर्तुमिच्छसि तव तव वल्लभजनस्य वा।

लावण्य०—[सक्रोधम्] दुष्टे! जानास्येतदाङ्गलराज्यम्। यत्रेदृशं मारणं न कदापि प्रच्छन्नं भवेत्।

दुःशीला—अत्रावाभ्यां निश्चितमेव। घातको नियुक्तः। यदि त्वं विषं न पास्यसि तर्हि बहिः स्थितं तं प्रेष्य तव भर्तारं गतजीवितं कुर्वः।

लावण्य०—रे दुष्टौ! मम भर्तर्यपि प्रसृतो युवयोर्मृत्युकरः करः। विरमतं विरमतमस्माद्दुराचारात्।

दुःशीला—तथा करिष्यावो यदि त्वं स्वयमेव विषं पाययित्वाऽऽत्मानमेव विषपानहेतुं स्वहस्तलेखेन समाख्यास्यसि।

लावण्य०—हृदय! सांप्रतं विकासितं मुखं शृगालेन। तव भूतकालकम्पः केवलमेतयोरधमहृदयान्तर्गतघोरविचारनिनादस्य प्रतिध्वनिरेवाऽऽसीत्। वन्दिनीव स्थिता कमहमत्राक्रोशामि कस्य वा सहायं याचे।

कपाटे संरुद्धे स्थलमिदमपि क्षोणिनिभृतम्।
स्थितावेतौ दुष्टावसुहरणकार्ये कृतधियौ॥
तथा मध्या रात्रिर्गहनतिमिरा सुप्तमनुजा।
कथं त्राणं स्यान्मे न चलति मतिर्लुप्तविभवा॥ १४॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

यदि मे माताऽजीविष्यत्तर्हीदृशी दशा नाऽपतिताऽभविष्यत् । अथवा विषमेऽस्मिन्संसारे भेद एवैष जनकजनन्योः ।

पिता वाञ्छेत्पुत्रं धननिधिमलं यः प्रगुणयेत् ।
तथा माता पुत्रीं क्रमविहितकार्यामभिलषेत् ॥
प्रसूतीनां मातुर्नहि भवति दुःखं क्षणमहो ।
मृता माता येषां मृतमपि नु तेषामिह जगत् ॥ १५ ॥

अथवा कन्याविक्रयीणां गृहे कन्यकानां भविष्यं कीदृग्भाव्यम् ।

कन्या लक्ष्मीरिति च कथनं भूतपूर्वं हि जातम् ।
लोकेऽस्मिन्सा जडविषयवत्पण्यते साभिलाषम् ॥
जातैवैषाऽन्यंतरमनुजैर्दुग्धनष्टा क्रियेत ।
कस्मात्कन्या जगति जनिता दुर्दशायां प्रणष्टुम् ॥१६॥

सुन्दर०–क्षिप्रं धावति रात्रिः कोऽर्थो विलम्बेन ।

दुःशीला०–श्रुणु । आत्महत्या संसारानिर्वेदान्मया कृता । पितुराज्ञामुल्लंघ्य तस्याजानत एव विषं पीतम् नात्र कस्याचिद्दोषः । एतल्लिखित्वा त्वया हस्ताक्षरं लेख्यं यदि क्षिप्रं न लिखसि तर्हि प्रभातमप्येष ते पतिर्न द्रक्ष्यति अत्रागच्छन्त्या द्वारसमीपस्थो दृष्टो मनुष्यो मया व्याघ्रतोऽस्मिन्कर्मणि । तस्मात्त्वरस्व ।

लावण्य०–अनिच्छतोपि मे दर्शनीयेच्छाऽऽत्मघात इति कठोरताया अवधिः । रे देवहतक ! किं दुष्कृत्यमाचरितं मया पूर्वस्मिञ्जन्मनि यथा तस्येदृशः परिणामः समुपनीतः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

सुन्दर०-किं विचारयसि दुःशीले बहिः स्थितः घातकः सुवर्णशतेन प्रेष्यतां मनोहरम् ।

[क्षिपति निष्कप्रसवेम् । दुःशीलातद्गृहीत्वागच्छति]

लावण्य०-[स्वागतम्] अरे प्रियं मे हन्तुमुद्युक्तौ । [प्रकाशम्] तिष्ठ ! तिष्ठ ! दुःशीले ! [दुःशीला घातकमानीय प्रविशति तं दृष्ट्वा] घातक ! विरम ! विरम ! रे दुष्टौ ! अस्माद्घोरपापाद्विरमतम् । अस्य घोरकृत्यस्य प्रत्युत्तरः परमात्मने देय इति क्षणं विचारयतम् ।

सुन्दर०-दुःशीले ! कस्माद्विलम्ब्यते । प्रेषयैनम् । तत्कार्येऽनुष्ठिते स्थापयैनप्यस्मिन्नेव भूमिगृहे यावज्जीवम् ।

दुःशीला-[घातकम्] सदो ! गच्छ सत्वरम् । कुरु तत्कार्यम् । अत्र ते श्रममूल्यम् ।

[घातको गन्तु प्रवर्तते]

लावण्य०-[संभ्रान्तचित्ता स्वागतम्] रे प्रभो ! किं करोमि । नास्ति मे जीवनं प्रियतमस्य प्राणेभ्योऽधिकम् । [प्रकाशम्] अधमे ! आहूय तं यमसहोदरम् । निष्कृष मे प्राणान् यावत्तृप्तं भवेत्ते हृदयम् । एवमनुष्ठितेऽपि यदि मे प्रियस्य प्राणाः संशयिताः स्युस्तर्हि निर्दोषहृदयप्रज्वलनादुत्पन्नोऽग्निर्युवयोर्जीवनं भस्मसात्कुर्यात् । [दुःशीला घातकं सूचयति]

दुःशीला-तिष्ठ बहिः ।

सुन्दर०-गृहाणैतद्विषम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दुःशीला-प्रथमं तावल्लेखो लेखनीयः ।

[मसीभाजनं पत्रं लेखिनीं च ददाति]

लावण्यवती-[तयोक्तं लिखित्वा] एवं युवां मुक्तौ हनन-दोषादत्र संसारे । अधुना मे प्रार्थना । भवद्भ्यां नाशितो मे संसारः हृतं च सर्वस्वम् । लिखितुमिच्छामि श्लोकत्रयेण मे स्वामिनेऽन्तिमं स्नेहसन्देशं येन मम प्राणत्यागं श्रुत्वाऽसावपि प्राण-मोक्षं न कुर्यात् ।

सुन्दर०-[दुःशीलां पश्यति]

दुःशीला-सदृशमेतत्पतिव्रतायाः । तथापि स्नेहसंदेशादन्य-तरं यदि लिखितं स्यात्तर्हि—

सुन्दर०-तदग्निसात्कुर्व इति किं कथनीयम् ।

लावण्य०-[निश्वस्य दन्तैरोष्ठं च निष्पीड्य विचार्य च लिखति]

रे रे त्वं प्रियवल्लभो नु रजनीमेनां कथं वाहये-
रेकाकी च कथं त्वमस्य जगतः पारं लभेथाः परम् ॥
यत्प्रोक्तं च मया त्वया न हृदये सत्कृत्य तत्स्थापितम् ।
पापं मे गतजन्मनः परिणतं कस्मै च तत्कथ्यते ॥१७॥
मरिष्यामीत्येवं न हि दहति शोको मम मनः ।
वियोगे त्यक्तव्या असव इति मे त्रासजनकम् ॥
तवाङ्के सुप्ताऽहं तववदनसंसक्तनयना ।
विलीयेऽहं नूनं हसितवदना मुग्धहृदया ॥ १८ ॥
गतप्राणा काभ्यां ममतनुरियं वल्लभ कृता ।
त्वया न ज्ञातव्यं व्यवसितमथैवं हि विधिना ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

यथा मृत्योर्हेतुर्न हि मदितरः कोऽपि मनुजः ।
कथं किं किं कस्मै जगति कथनीयं ननु मया ॥१९॥

दुःशीला–भवत्वेष सन्देशः । पिबाधुना तेऽमृतम् । प्रभातगामिनी दृश्यते रजनी ।

लावण्य०–[सकम्पं गृहीत्वा] रे हालाहल ! मां मा पीडय ! न किञ्चित्ते वाऽन्यस्य वा मयाऽपराद्धम् । अपहर मे प्राणान् द्रुतम् [पिबति] ।

सुन्दर०–[सहर्षम्] अहो ! पीतम् ।

दुःशीला–माऽऽक्रोश यावन्मृत्युस्त्वां गृह्णाति तावच्चीत्कारांशमप्युद्गिरपि तर्हि जानीहि न ते भर्ता जीविष्यति । सुन्दर ! [तं हस्तेन गृहीत्वा गच्छति] नास्य वृत्तस्य छायाऽपि तव मुखोपरि द्रष्टव्या । [निष्क्रान्तौ]

लावण्य०–गतौ यगदूतौ । विषं प्रसरत्यङ्गेषु । किं भवति हृदये । कथं च प्राणा गच्छेयुः । वल्लभ ! वल्लभ ! न दृष्टं प्राणान्तसमयेऽपि ते मुखम् । त्वयोपकृतं मम मया दुर्भागिन्या तु तवाऽपकृतमेव ।

न संस्पृष्टौ श्रान्तौ दयितचरणौ ते दयितया ।
न दत्तं पानीयं प्रसृतकरपात्रेण च मया ॥
न दत्तं पक्वान्नं मम च करसिद्धं तव मुखे ।
निराशीभूताया इदमुपरतं जीवनमहो ॥ २० ॥
न नीतः कालोऽयं सुमधुरवचोभिस्तव कदा ।
न मे कर्णौ शुद्धावमृतसमशब्दैरुपयुतः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

न पीतं पीयूषं नयनरसदिग्धं च सुचिरम् ।
तदा तत्संवृत्तं मनसि न मया यत्कृतमिदम् ॥२१॥
मया भर्ता लब्धो हृदयसुखदाता प्रियगुणः ।
गता रात्रिः कृष्णा विलसति सुधांशुः शतगुणः ॥
यदैवं सौभाग्यं विवृतमधुनेति प्रमुदितम् ।
तदैवं तद्द्वारौ प्रसभमवरुद्धे कुविधिना ॥ २२ ॥
पतत्वेवं दुःखं मम बहुषु जन्मस्वविरतम् ।
प्रणष्टा लक्ष्मीर्मे भवतु विविधा भाग्यविहिता ॥
सपात्रा भिक्षार्थं वनमधि वनाद्यामि सततम् ।
तथाप्येवं भर्तुः क्षणमपि वियोगं न हि सहे ॥ २३ ॥
ममेच्छा नह्येषा.....

[वक्तुमशक्ता श्वासं कथंकथमपि गृह्णती]

जिह्वा मे न प्रसरति । कण्ठः शुष्यति । [इतस्ततो दृष्ट्वा] पानीयमपि न वर्तते । अथवा स्नेहविरहितेऽस्मिन्गृहे कस्माज्जलं याचे। [पतति । शून्यमुखी भवति। कथं कथमप्यात्मानमुन्नाम्य] प्रभो ! उद्वाहय मे हृदयध्वनिम् । उत्क्रामय मे स्नेहरश्मिम् । [पुनः पतति] भर्तारं.....प्रि.....नि–नि–वेदयत–गृ....ह –दे–व–ताः–[स्वरः क्षीयते]....कीदृशं–म–म-ह-द-य-म् ॥ [अङ्गसंक्षोभं नाटयति] [आलुट्यति]

दुःशीला–[प्रविश्य] मृता [समीपं गत्वा निर्वर्ण्य] न हि मृतप्राया दृश्यते । प्राणवृत्तिरद्यापि प्रियते । जाने पादघटिकया निष्प्राणा भविष्यति । [हसति] शिरोमुण्डनात्कम्पमाना पति-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

सुखाभिलाषिणी पुनर्विवाहकारिण्येवं म्रियते । [लावण्यवती मृतावस्थां नाटयति]

दुःशीला-[निर्वर्ण्य] मृता । कण्टकवल्लर्युद्धृता । निवेदयामि सुन्दराय । अत्रान्वेषणं भविष्यति । आगमिष्यति च नगररक्षकाणामधिपतिः ।

[नेपथ्ये] सुन्दर०-[आह्वयति] लावण्यवति !

दुःशीला-[तच्छ्रुत्वा] शान्तिदास आगत इति भाति । [अवलोक्य] प्रभातं संजातम् । मनोहरोऽपि पथि वर्तत इति तर्कयामि । कथमाचरितव्यमिति सुन्दरोऽपि मया पुनः पुनः ज्ञापितः।

[नेपथ्ये-पुनः सुन्दर०-लावण्यवति ! कुत्र वर्तसे त्वम् । सत्वरमाच्छ]

दुःशीला-वर्तते सा यमसदनपथि । [हसति] [विचार्य] अन्वेषणात्पूर्वमेव मयेतः स्थानात्तथा पलायितव्यं यथा न कोऽपि मामत्रागतां पश्येत् । [पुनो लावण्यवती मृतेति प्रतीत्य सानन्दा निष्क्रमति]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दृश्यं चतुर्थम् ।

[स्थलम्-उपरितनापावरके]

सुन्दर०—लावण्यवति । आगतस्ते पितृव्यः कथं चिरायते त्वया ।

दुःशीला—[वस्त्राणि सुसंगतानि कुर्वत्यागच्छन्ती] न वर्तते सा तस्या अपावरके । अत्रैवागता भविष्यति ।

सुन्दर०—नागताऽत्र। पश्य यदि सखीं चतुरिकां द्रष्टुं गता।

दुःशीला—न तथा। चतुरिकादय आगता ममापावरके वार्तालापं कुर्वन्ति । [निष्क्रान्ता]

सुन्दर०—तर्हि कुत्र गतैषः। परिहीयते मुहूर्तवेला सर्वेऽप्यत्र सज्जीभूताः । न प्रथमरङ्गवदत्र करणीयानि वर्तन्ते ।

शान्तिदास—मृग्यताम्। युष्मद्गृहे स्थितैषा कुत्र गता स्यात्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

Digitized By Siddhanta eGangotri Gyaan Kosha

सुन्दर०—भ्रातर ! मनोहरदास आगतइति तर्कयामि । गच्छ त्वम् । आनय लावण्यवतीम् । पश्य जयदास ! समुचितं ढश्यते मे शिरोवेष्टनम् ।—अहो जामाताऽऽगतः । [ततः प्रविशति मनोहरदासः । तत्क्षणं श्रूयते शान्तिदासस्यार्तस्वरः ।]

शान्तिदास-[नेपथ्ये] एहि एहि सुन्दर ! दुष्करमापतितम् ।

मनोहर०-[प्रणम्य सुन्दरम्—आर्तस्वरं च श्रुत्वा चकितः] कस्यार्तस्वर एषः ।

सुन्दर०—न जानामि । चिरायितायां लावण्यवत्यां वारंवारं शब्दायितायां चोत्तरमददत्यां च तस्यां गतः शान्तिदास एनामन्वेष्टुम् ।

मनोहर०-किं निमित्तमधिकृत्य गता ।

सुन्दर०—अद्याऽधुनैव लग्नमित्यात्मानमलंकर्तुम् । आगच्छतु भवानपि । पश्यावः कस्यार्तस्वर एषः [निष्क्रान्तौ सजयदासौ]

[भूमिगृहे]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

दृश्यं पञ्चमम् ।

शान्तिदास–[सुन्दरादीनागतान्दृष्ट्वा] सुन्दर ! [लावण्यवतीं दर्शयन्] केन कृतमेतत्

सुन्दर०–[साश्चर्यम्] भ्रातर् ! किमनुष्ठितं केन च ।
[लावण्यवतीमपश्यन्निव पश्यति]

सर्वे–[संभ्रान्ता आगत्य] किमापतितम् ।

सुन्दर०–[लावण्यवतीं शान्तिदासेन दर्शितां दृष्ट्वा] अत्याहितमत्याहितम्, प्रियपुत्री मे लावण्यवत्युपरता [मस्तकं ललाटं च प्रहरति]

शान्ति०–जयदास ! आहूय निपुणम् । [स गच्छति]

दुःशीला–[निर्दिश्य] न हि नद्योपरता मूर्छितैव । पश्यैवं संज्ञां प्रत्यागमिष्यति । [पल्लवेन वायुं विदधाति]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

मनोहर०–शान्तिदास ! आहूय नगररक्षाधिपालमू । केनाऽपि विषप्रयोगोऽनुष्ठित इति मे भाति ।

दुःशीला–[सोरस्ताऽम्] रे देवदतक ! कथं सहस्रधा न शीर्णं ते हृदयमस्याः परिणयमभिमुख्याः प्राणान्हरतः ।

सुन्दर०–लुप्तपुत्रीधनोऽहम् । अथ मया ज्ञातमासीद्यथा साऽलंकृता परिणीताऽनुभविष्यति पतिसुखम् । [तारस्वरेण रोदिति]

शान्तिदास०–मा रुदिहि । अत्र द्वे पत्रे अनेन भवान्निर्दोषः प्रमाणीक्रियते । अपरेण च–

सुन्दर०–सत्यमहं निर्दोषः । न जाने कथं सा मृता ।

दुःशीला–[तारस्वरेण रोदिति] हा धिक् ! हा धिक् ! अत्याहितमहो मङ्गलकार्येऽमङ्गलं समापतितम् ।

शान्ति०–मनोहर ! एतत्तेऽपरं पत्रकम् ।

मनोहर०–[अश्रुण्वन्] तिष्ठ तत्रैव । न केनाऽप्येषा स्प्रष्टव्या । न वा पत्रेपि वाचितव्ये । आगच्छामि स्वयमेवाहूय वैद्यं नगररक्षाधिपतिं च वर्तते मे शङ्का ।

सुन्दर०–वारय मनोहरम् । अधिक्षिपत्येष मां पुत्रीमरण-दुःखार्णवे पतितम् ।

शान्तिदास–अहो ! आगतो वैद्यराजो नगररक्षाधिपतिरपि ।

[द्वावुपसर्पतः]

रक्षाधिपति०–शान्तिदास ! सुप्रभातमद्य ते । वैद्यराजेन निवेदितं यथा युष्मद्भ्रातृभ्यां विषेण मृतेति । असौ तु निदानार्थं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अवताऽहूतोऽहमपि स्वाधिकारमनुस्थातुमागतः [अभितो दृष्ट्वा] निर्गमय सर्वान् बहिः। त्वमेवात्रैकाकी तिष्ठ। आगमिष्यत्यत्र राज्यभिषग्मया समाहूतः। [ततः प्रविशति राज्यभिषक्]

शांति०—सर्वेऽपि बहिर्निःशब्दं तिष्ठन्तु। मनोहर! त्वमपि सुज्ञ इव प्रशान्तचित्तस्तत्र प्रतिपालय।

[राज्यभिषक्चिचकित्सते] [सर्वेनिष्क्रामन्ति]

मनोहर०—[स्वगतम्] सत्यं केनाऽप्यनुष्ठितः प्रयोगः। मम प्रियतमा न कदापि स्वयं विना कारणं लग्नदिवस-प्रभाते आत्महत्यां कुर्यात्—

नैवं त्यजेत्सा निजदेहवृत्तिम्।
विधेत हेतुर्न हि कश्चिदत्र॥
ज्योत्स्ना न लुप्ता भवति स्वयं चेत्।
राहुं विना को ग्रसते शुभां ताम्॥ २४॥

इति।

विषप्रयोगाख्यश्चतुर्थोऽङ्कः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

पञ्चमोऽङ्कः ।

मञ्जरी—हा धिक् ! हा धिक् ! उन्मत्त इवातीव संभ्रान्तचित्तो मनोहरो लावण्यवत्या मृतदेहं गृहीत्वागतः ।

चतुरिका—सखि ! समाश्वसिहि ! गतो धैर्यशीलः शान्तिदासोऽन्येनना अपि । न तस्य चिन्ता कार्या । शान्तचित्ताऽत्रोपविश ।

कामन्दकी—सखि ! दुःशीलया प्रोत्साहितेन सुन्दरदासेन बलाद्विषं ग्राहिता लावण्यवतीति सिद्धं न्यायमन्दिरे । तथापि मनोहरस्य हृदयसंक्षोभो न शान्त इति किम् ।

मञ्जरी—स्नेहप्राबल्यमेवाऽत्र कारणम् ।

एका स्त्री—सुन्दरदासे तु वधस्तम्भमारोपयितव्ये केवलं यावज्जीवमसौ देशान्निष्कासित । दुःशीलाऽपि तादृशं दण्डमनुभूतवतीत्यपि हृदयसन्तापशमनायाम् ।

मञ्जरी—ननु कथयामि स्नेहातिशय इदृशे समये बुद्धिमान्द्यमुत्सादयति ।

द्वितीया०—सत्यमेतत् । परन्तु कथमेतौ सदोषौ प्रमाणीकृतौ । मया तु श्रुतं यथा लावण्यवत्याः स्वहस्तलेखनैतौ निर्दोषौ स्थापिष्येते इति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

मञ्जरी–सत्यमाविलयितुं न कोऽपि शक्तः। ताभ्यां दुष्टाभ्यां लावण्यवती बलाल्लेखं लेखिता। तत्र 'विषं दत्तं काम्या'मित्याया मनोहरमुद्दिश्य लिखितेऽपरस्नेहसंदेशपत्रे स्थितया पङ्कजया सिद्धं यथा तया विषं स्वयं न पीतम्। अपि च परिणयाभिमुख्याः कस्याश्चिदपि कन्यकाया ईदृश संसारविरागो न संभाव्यः। अपरं च मनोहरदासेन सा पितुर्गृहं प्रापिता तावन्नासीत्किञ्चिदपि निर्वेदकारणम्। तथा च सोमगास्त्यं विषमौषधिमिषेण दुःशीलया क्रीतमिति कस्माच्चिद्विक्रेतुर्नगरक्षकैः समुपलब्धम्। अन्ते हेतुवादिना सयुक्तिकं परीक्षितेन सुन्दरदासेन सत्यमुद्भान्तम्। दुष्टया दुःशीलयाऽपि प्रथमं स्त्रीचरित्रं कृतं तथापि सुन्दरदासाङ्कुश्च सत्येन हेतुवादिना सत्यमुद्भावितम्।

एका०–कीदृशो भयङ्करः पिता।

द्वितीया–भगिनी च।

चतुरिका–कदाचिदीदृशः संसारः। तथापि सौराष्ट्रविरहिते गुर्जरदेशे शुल्कग्रहीतेदृशः पुत्रीघातकः पिता विरलः।

अपरा–[मञ्जरीं निर्दिश्य] चतुरिके! चतुरिके! अत्रस्था दृश्यते मञ्जरी। सत्वरमुपायः क्रियताम्।

चतुरिके–सखि! आनय पानीयम्। श्मशानादाहूयतां मनोहरदासः। अथवाऽऽहूय वैद्यम्।

[इति मञ्जरीं संज्ञां प्रापयितुं प्रयतंते]

प्रवेशकः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

[ततः प्रविशति शांतिदासेनानुगम्यमानः सोद्वेगो मनोहरः श्मशाने]

मनोहर०-अहो ! नष्टं सर्वं जगति नु कलत्रे त्वयि गते ।
लभे किंचिन्नैवं हृदयसुखदं नेत्रविषयम् ॥
तदा किं नेत्राभ्यां यदि न शतधा तेप्यभवताम् ।
नखैस्तीक्ष्णैरेवं ननु सपदि लुंचेयमधुना ॥ १ ॥

[तथा कर्तुं प्रयतते]

शांति०-अहह ! मनोहर ! नैतत्ते समुचितम् ।

[निवारयति]

मनोहर०-कस्त्वं मां निवारयितुम् । रे निर्दय हृदय ! पश्य जीवन्तं मां दृष्ट्वा हसति मे प्रिया ।

कुटिलनेत्रजतीक्ष्णसायकै-
रविरतं हसता वदनेन सा ।
नयनजं त्रिपुरारिहुताशनम्
मम तनौ क्षिपति प्रवितापकम् ॥ २ ॥

अपि च

विषेणाक्तावोष्ठौ हतसहजरागौ मुकुलितौ ।
स्फुरन्तौ संस्तब्धौ हृदयगतभावस्य कथने ॥
तथाऽप्यत्तामेनं वदनगतरेखं सुविहितम् ।
न तौ द्रष्टुं नेत्रे भवत इमे भावचकिते ॥ ३ ॥

CC-0. Jangamwadi Math Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

शान्ति०—वाराणस्यां सुशिक्षितः सुजनो नैवं प्रलपति । सुशिक्षणमिति मनोनिग्रहः अनुभूतिस्तु पुनरावृत्तेः कार्यस्य प्राप्तेः कार्यदक्षता प्रत्युत्पन्नमति त्वं च । त्वयैते द्वे संप्राप्ते कथं तर्हि निर्बलमानसः संजातः ।

मनोहर०—भावविशेषप्रधाना मानवसृष्टिः । तस्यामुत्पन्नोऽहम् । यदीदृशे संयोगे मे हृदयं न द्रवेत्तर्हि को भेदो मम पशोश्च । इयं तु विपदः पराकाष्ठामनुभूय गता कथं मे हृदयसंक्षोभं न कुर्यात् ।

सकष्टं गच्छन्ती स्वपदगतिभङ्गेन रुदती ।
क्षमा नासीद्देहं गलितवसनेनावरयितुम् ॥
प्रदत्ता निःसंज्ञा परिणतवयस्काय धनिने ।
श्रुतं तल्लोकान्मे मनसि बहुतापं जनयते ॥ ४ ॥

अपि च

तथैवं दृष्टा सा कुटिललनाभिः परिगता ।
धृता केशैस्ताभिः पुनरपि पुनः केशवपने ॥
कथं स्यात्तच्चित्रं हृदयमनुषक्तं विगलितम् ।
क्षुरस्तीक्ष्णो यावद्वचलसदभितो नापितकरे ॥ ५ ॥

अपरं च

मया सार्धं याता गिरिशिखरमेषा सुवदना ।
रसोल्लासेनैवं प्रतिपलमपिञ्चन्मम मुखम् ॥
समक्षं चैतस्या जगदिदमतिष्ठद्रसमयम् ।
तदाशाभग्नाया दहति न कथं मामविरतम् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

अथवा—

विधेश्चित्तात्स्रास्तं कथमपि हि रक्ष्या मम वधूः ।
तया दुःखं सोढं यदितरजनै र्नाप्यवगतम् ॥
वराक्या अस्या वा भवति कथमीदृङ्नु मरणम् ।
न सद्वृत्तानेवं प्रहरति विधिर्निर्दितरम् ॥ ७ ॥

शान्ति०—निरङ्कुशा भवितव्यता । केनाऽस्याः प्रावल्यम-धिक्षिप्यते । पश्य—

सकष्टं लब्धा या शिवशिरसि गङ्गा स्थितवती ।
पुनर्विष्णुं त्यक्त्वा कृपणमनुजान्श्रीरुपगता ॥
यथा यद्यल्लब्धं निजतनुसुखार्थं सुमहत्तम् ।
तथातत्तत्तेषां भवति विपरीतं ननु कथम् ॥ ८ ॥

मनोहर०—निरंकुशता संभवति न तु निर्दयताऽस्याः । अनया तु न दृष्टं यथा—

क्व हर्तृ प्राणानां विषमिदमियं काऽत्र सुतनुः ।
क्व घोरं रूपं तत्क्व मधुमधुरेयं रसवती ॥
यदा हन्तुमैच्छत्कुसुमदलदेहां कथमपि ।
प्रवृत्तोऽयं लब्धुं परुषतरशस्त्रं कथमहो ॥ ९ ॥

तथा च

श्वसन्त्येवं दुष्टा इह जगति दुष्कर्मणि रताः ।
न लब्धः कोऽप्येषां प्रबलहननेच्छां शमयितुम् ॥
भवेद्वा हन्तॄणां किमु वरणवृत्तिर्बलिगणे ।
क्षणं मक्ष्यं दृष्ट्वा चिरयति गरुत्मा न हि खगे ॥१०॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

[ततः प्रविशति मनुष्यः]

[अन्ये जनाश्च काष्ठादीन् गृहीत्वा चितां रचयितुं प्रवर्तन्तेऽदूरम्]

मनुष्य-[उपसृत्य शांतिदासं] श्रीमन् ! सज्जीक्रियते चिता । यदुचितं तदारभस्व कार्यम् ।

मनोहर०-चिता ! कस्याश्चिता । न खलु मम प्रियामग्निसात्कर्तुं प्रवृत्ताः । [अन्यजनानुपसृत्य] रे निर्दयाः अस्यां दशायां वर्तमानां वराकीमेनां पीडयितुं कथं चिन्तितं भवद्भिः ।

प्रसुप्ता शय्यायां कथमसमकाष्ठेषु शयिता ।
कथं तस्या देहो हुतवहशिखां वाऽनुभविता ॥
मृदुत्वं तन्वङ्ग्याश्चपलनयने केशकबरी ।
तथा दग्धेऽङ्गे स्यादहह निखिलं दग्धमधुना ॥११॥

मनुष्य-बन्धो ! मृतकस्य त्वेवंविधो निरस्तित्वोपायः । प्राणागताः । निश्चेतनं चेदं वपुः । कुतो भवदीयशङ्काभयमत्र ।

मनोहर०-मूढ ! कथं कथ्यत एतन्मृतकवपुरिति । पश्य-

मृता नैषा सत्यं सुकृततनुपथ्या सुनयना ।
गता दुःखस्यान्तं स्वपिति सुचिरं शान्तमनसा ॥
कपोलौ रागाक्तौ गतसहजवर्णौ गमयतः ।
प्रमाणं दुःखाब्धेर्यदियमवतीर्णा सुमहतः ॥ १२ ॥

अपि च

वपुः शीतं सौम्यं श्रमघटितमेतत्प्रतिमुखम् ।
तथैवं प्रत्यंगे तुलितनिहितं सौष्ठवमिदम् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

विधातुर्नैपुण्यं प्रथममनुसृष्टौ यदभवत् ।
तदेवाविष्कुर्वन्कथमिह विहन्यात्कृतिमिमाम् ॥२३॥

मनुष्य०-[शांतिदासम्] श्रीमन् पुरोहितो भवन्तमाह्वयति पश्य एवं चितायां निधातुं प्रवर्तन्ते जनाः ।

मनोहर०-[सहसा तत्रोपसृत्य] तिष्ठत ! तिष्ठत ! कथमुन्मत्ता इव प्रवृत्ताः ।

विषेणेयं दग्धा कुशतनुरियं तन्न किमलम् ।
यथा यूयं सर्वे कृतमतय एनां ज्वलयितुम् ॥
कृतान्तो युष्माकं सरलहृदयं प्रेरयति वा ।
तृणं सर्वं दग्धुं प्रभवति समिद्धं हुतभुजा ॥१४॥

शांति०-यां त्वं म्रियमाणां मन्यसे सा तत्त्वतो मृतैव । यथा

नहि श्वासोच्छ्वासश्चलति हृदयं चालयति वा ।
न रक्तस्रोतो वा प्रवहति शिरासु प्रशमितम् ॥
तथांगानामुष्मा ननु विगलितां पश्य सकलाम् ।
कथं प्राणाः शक्या यदि भवति जीवो न हृदये ॥१५॥

तथा च

वपुः शैत्यं यातं स्फुरति न खलु स्तम्भितमिदम् ।
नहि स्तब्धे तारे नयनगतभावं विसृजतः ॥
क्षतः क्षुण्णो दग्धः क्षणमपि न पीड्येत च यदा ।
तथा त्यक्तो देहः कुणप इति दह्येत मनुजैः ॥ १६ ॥

तस्माद्धैर्यमवलम्बस्व । मा शोकं कुरु । यदि मृतो देहो न दह्यते तर्हि विकृतो गन्धं प्रेरयति । जनारोग्यं च क्षपयति । तस्मात्पञ्चमहाभूतसमुत्पन्नः पञ्चमहाभूतस्वरूपमेव नेयः । यथा—

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

य एवासीज्जीवो निजकृतिमनुष्ठाय चलितः।
गतश्चान्यं लोकं कृतफलमवाप्तुं द्रुततरम् ॥
क्व सः स्वर्गं गन्ता क्व च वपुरिदं तस्य पतितम्।
न संबन्धः कश्चिन्मृतकयोर्मृत्युमनुगः ॥ १७ ॥

अपि च जीवस्यावतारदेहः कर्मफलोपभोगार्थो नूतनकर्मकरणाय च। तद्देह सन्बन्धः प्राक्त्वापेक्षया चलः। एवं सति का संभावना रुधिरास्थिमांसमेदआदिसंघात रूपस्याऽनेकावतारप्राप्त्यर्थं मोक्षार्थं वा सेतूभूतस्य देहस्य। पश्य—

भवेच्छूरो युद्धे भट इति पदं सोऽत्र लभते।
तथैवं सेनानीर्भटगणमुखे स्यादधिकृतः ॥
यथैवं ज्ञायन्ते क्रमपदगतेनैव मनुजाः।
तथा सक्त्वा पूर्वं जननमिव जीवाः प्रगमिताः ॥१८॥
अथैवं संभूते मनुजगणजीवाः प्रमथिताः।
ऋणच्छेदं कर्तुं निजकृतिनिबद्धाः प्रजनिताः ॥
अथैकस्मिन्योगे जनकतनये येऽत्र भवतः।
भवेतामन्यस्मिन्दयितदयिते ते विधिवशात् ॥ १९ ॥
शालायामपि त्वयैतत्सुवचनं श्रुतम्।
यथा काष्ठं च काष्ठं च समेयातां महोदधौ।
समेत्य च व्यपेयातां तद्वद्भूतसमागमः ॥ २० ॥
तस्मात्स्थिरीकृत्य हृदयं तिष्ठ यावदग्निं प्रज्वलयामि।

[गन्तुमारब्धः]

मनोहर०—नहि नहि तत्त्वज्ञानमेतत्संभवति। भावमूला हि सृष्टिः। भावमूलं हि सूक्ष्मशरीरम्। अनेन वेष्टितो जीवः प्रतीक्षते

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

प्रतिव्यक्तिममुत्र । यदि तावत्कालं सा प्रतिभावं न व्यनक्ति तर्हि दुःखपूर्णमानसः स जीवो दुःखार्णवे निमग्नोऽतिशयं पीड्यते ।

निबद्धो भावेन भ्रमति ननु जीवः परिगतः ।
प्रियं वक्तुं किंचित्प्रभवति न वाचा विरहितः ॥
प्रतिव्यक्तिस्तोपं जनयति यदा भावरुचिरम् ।
कथं मोक्षोऽसाध्यः प्रियतमजनस्याभिलषितः ॥२१॥

तथा च भगवता वासुदेवेनाप्युक्तम् ।

यं यं वाऽपि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय ! सदा तद्भावभावितः ॥ २२ ॥

तदनुसारेण मय्यारोपितचित्तैषा मद्भावमुपगता । यद्यहमध्येनां स्मरन्निदं कलेवरं त्यजेयं तदाऽहमपि तामेव यास्यामीति कः संदेहः । अपि च–

प्रियां त्यक्त्वा किञ्चिज्जगति मम नान्यत् प्रियतरम् ।
न वाऽन्या काचिन्मे हृदयविषयेऽत्राभिरमते ॥
तदीया मे सृष्टिस्तदनुकलिता दृष्टिरिह मे ।
विनैनां संसारः कथमपि न मे स्यात्सुखकरः ॥ २३ ॥

शांति०–भवतु । तर्हि यथा साऽग्निसात्कृता न स्यात्तथा विधायागच्छेयम् [चितामभिसर्पति]

मनोहर०- [विचारे निमग्नः] यद्येषा मृता जीवोऽन्यादेहान्निसृतस्तर्हि किं प्रयोजनं ममास्य देहेन। तिष्ठ ! तिष्ठ रे देवि !

अदूरं त्वां यातामहमनुगमिष्यामि चपलम् ।
कुरुक्षीणं शब्दं पतति च तथा मे श्रुतिपथम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized By Siddhanta eGangotri Gyaan Kosha

गतानां जीवानां जगति च तथा त्वामुपलभे ।
त्वया संयुक्तोऽहं पुनरपि लभेयात्मविभवम् ॥२४॥

[श्रुतमिति किञ्चित्समाकर्ण्य]

अहो श्रूयन्तेऽत्र श्रुतिसुखकराः शब्दनिकराः ।
यथा वीणानादस्तवमृदुकरेणैव जनितः ॥
यथा कश्चिद्दन्ती पिहितनयनो मन्दगमनो ।
समाकृष्टो यायाद्रवमनु तथेयं ममगतिः ॥ २५ ॥
अशक्तोऽहं स्थातुं हृदयमपि मे तामनुगतम् ।
तथा शून्या दृष्टिर्न जगदनुबद्धं मम मनः ॥
किमेभिः प्राणैर्वा किमपि च वृथा देहभरणे ।
प्रिया शब्दैरेवं यदि सुतनुरेषाऽऽह्वयति माम् ॥२६॥
विरम विरम देवि ! त्वाऽनुयाम्येष तूर्णम् ।
त्वरितचरणपातैरात्ममोक्षं विधाय ॥
ज्वलति दहन एष ज्वालया धारयित्वा ।
द्रुतमभिगमयेन्मे त्वाममून् वै शिखाभिः ॥ २७ ॥
जलदरथमभुं वै प्रेषितं वासवेन ।
प्रचुरसुकरणैस्ते पक्वतामद्य यातैः ॥
पवनहयमुयुक्तं नन्वधिष्ठाय शीघ्रम् ।
कृतिविहितसुलोकं संगमिष्यावहे तम् ॥ २८ ॥
विहितपरिणयौ चेत्तत्र दैवेन चावाम् ।
ननु तदपि भवेद्वा संशयो नात्र कार्यः ॥
यदनवगतमत्र स्यान्मनुष्यस्य भाग्यात् ।
तदनुगुणमथैवं प्राप्यते देवलोके ॥ २९ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

तत्र स्थित्वा विविधविभवान् प्राप्य भोगान्सुयोगात् ।
तत्सामीप्याज्जनितरसतास्वादमास्वाद्य यावः ॥
संयुक्तौ वै रसमयतनू अन्यलोकांश्च विश्वे ।
यातौ तत्राऽप्रतिमपरमां शक्तिमालोकयावः ॥२०॥

मनुष्य-[चितां प्रज्वाल्य] शांतिदास ! मन्येऽहं सुप्रज्वलिता चिता अल्पेनैव कालेन शवं भस्मसात् करिष्यति । तथाप्यवशिष्टं घृतं क्षिप्त्वा पात्रं क्षालनयोग्यं करोमि ।

मनोहर०-[तच्छ्रुत्वा] ससंभ्रमम्] प्रज्वलिता चिता तथा करोति मे प्रियतमायाः शरीरं दह्यते ।

घोरा ज्वाला हुतवहसृता व्याप्य तन्वङ्गमस्याः ।
सौन्दर्यांशं यदविगलितं भक्षणेऽस्य प्रवृत्ता ॥
पुष्टं या यद्विविधविधिभिर्भक्ष्यते तत्तदेवम् ।
कस्माज्जीवस्तमभिलषते यस्य भाव्या दशैषा ॥२१॥
क्षुधा क्षुब्धश्चासौ दहति दयितां निर्दयतरः ।
वसां स्रस्तां देहान्ननु रसनया लेढि मुदितः ॥
तथा कृष्णीभूतं बत विकृततां यान्तमधुना ।
विनष्टं कुर्यात्सोऽपर इव कृतान्तः कृतभयः ॥२२॥
त्वया लब्धो देहः शव इति विजीवो हुतभुजा ।
तनुस्तावत्सोष्मा ह्यविकृतसजीवा तव कृते ॥
मया दत्तास्यात्ते यदि दयितया मां द्रुततरम् ।
नियुञ्ज्यास्त्वं प्रेम्णा सुहृदिव सुजातः प्रमुदितः ॥२३॥

[अग्निः सविशेषं ज्वलति]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

शांतिदास०-[मनुष्यं समुपस्थितम्] सुप्रज्वलितः। एकां घटिकां प्रतिपालयिष्यामो मनोहरदासस्य समीपम्। यावदग्निः स्वकार्यं करोति मनोहरश्चास्याभिरितरविषयमुद्दिश्य प्रोक्तः प्रशांतो भवेत्। [मनोहरं प्रतिगन्तुं प्रवर्तन्ते]

मनोहर०-[अग्निं प्रतिबद्धदृष्टिः]

ज्वलसि मम वचोभिर्मित्रकार्याणुपक्तः।
त्वरितसृताशिखाभिश्चाह्वयन्मां स्थितस्त्वम्॥
प्रसृतविटपिशाखां सत्वरं लम्बमानः।
तव मुखविवरान्तो मध्यभागे पतिष्ये॥ ३४॥

[वृक्षमारोहति]

शांति०[तं तथा कुर्वन्तं दृष्ट्वा] मनोहर! कस्माद्वृक्षमारोहसि। ननु न गृहीत पन्था उन्मत्तानाम्।

मनोहर०-[वृक्षस्योपरि स्थितः] प्रिया मामाह्वयति। अग्निर्मांत्वरयति। कथय मे सन्देशमार्यजनसमुदायाय। यथा स्नेहलग्नभंगस्य कृतवृद्धलग्नस्य परिणाम ईदृशः।

[त्वरितगतिः शाखां लम्बितुं प्रवर्तते]

शान्तिदास-[आक्रोशति] विरमोन्मत्त! विरम! रे नन्दन! वृक्षमारुह्य गृहाणैनम्।

[नन्दनस्तथाकर्तुं प्रवृत्तः। मनोहरः शिखामालम्बितः पतत्यग्नौ]

अहो! अत्याहितमत्याहितम्।

अन्ये०-आगच्छत! आगच्छत! धावत! धावत! एनं बहिराकृषामः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

शान्ति०–विरमत । अतीव दग्धाङ्गो बहिराकृष्टो भृशं पीडयेत । पीडितोऽपि न जीविष्यति ।

अहो ! स्नेहादर्शो जगति मम दृष्टौ न पतितः ।
यथेदृक् संदष्टोऽप्रतिमयुगलेनात्र विहितः ॥
न वार्तश्चीत्कारो हुतवहपरीतास्य वदना-
च्छ्रुतो वाङ्गं किञ्चित्प्रमथितमहो भूतमनले ॥३५॥

मनुष्य–किं कार्यमधुना ।

शान्ति०–एवमेव सर्वे शुल्कोपजीविनः पितरो जमातरो वा दग्धा भवन्तु । अपि चात्रैव चिताश्थाने तादृशीनां रूढ्यादीनां क्षयकरः शिलालेखः कार्यः यथा —

न कश्चिद्गृह्णीयात्कथमपि हि शुल्कं परिणये ।
न वा कश्चित्कुर्याज्जरठजनलग्नं मतिभवम् ॥
यथा वृद्धेनोढा विषमपरिणामं प्रगमिता ।
तथाऽस्याः कान्तेन ज्वलदनलयोगादुपरतम् ॥ ३६ ॥

तथा च

वार्तैषा प्रसृता च भारतजने देशात्प्रदेशं गता ।
शुल्कादिग्रहणं च तत्र विहितं कुर्यात्समूलं गतम् ॥
वृद्धानां च विवाहकार्यकरणं सर्वं समुन्मूलयेत् ।
संसारं युवतीजनस्य कुशलं कुर्याच्च संस्कारिणम् ॥३७॥

इति ।

चिताज्वलनाख्यः पञ्चमोऽङ्कः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

श्लोकानामनुक्रमाणिः ।

श्लोकाः		पृष्ठांकाः
१.	अग्निः प्रज्वलित;	६
२.	अङ्गं तप्तं	४२
३.	अथैवं संभूते....	७५
४.	अदूरं त्वां यातां	७६
५.	अरे ! मे कन्याया	३६
६.	अर्थो हि कन्या	९
७.	अलंकृत्य निज कन्यां	१०
८.	असारे संसारे	२२
९.	अशक्तोऽहं	७७
१०.	अहो नष्टं	७०
११.	अहो श्रूयन्ते....	७७
१२.	अहो ! स्नेहादर्शी	८०
१३.	आकाशे विपुलोदरे	५
१४.	इयं पुष्पश्रेणिः	२२
१५.	इह तव सदृशा	३०
१६.	उन्मूलयेत्स्वकुलधर्मं	३५

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

श्लोकाः		पृष्ठांकाः
१७.	कदा रेवातीरे	२२
१८.	कदास्यान्मे गेहं	३६
१९.	कपाटे संरुद्धे....	५६
२०.	कन्यामीदृशमानवाय	१०
२१.	कन्यां तव	२०
२२.	कन्यां प्रार्थयता	३२
२३.	कन्या लक्ष्मीरिति	५०
२४.	कालो गतः सुचरिते	४९
२५.	काश्चित्कान्ता	६
२६.	काश्चिन्नार्यः	६
२७.	कुटिलनेत्रज	७०
२८.	कोमलं वल्लरीवृन्तं	३
२९.	क्रोधाक्ते नयने	५४
३०.	क्रोधपूर्णं मनः	४२
३१.	क्व हर्तुं प्राणानां	७२
३२.	क्षुधा क्षुब्धश्चा	७८
३३.	क्षिप्रं क्षिप्रं घनतिमिर	४८
३४.	गतप्राणाः काभ्याम्	५९
३५.	गतप्रायः सूर्यः	४७
३६.	गृहीत्वा कण्ठे त्वां	२०
३७.	ग्रीष्माग्रे	५
३८.	घोरा ज्वाला	७८
३९.	चूतं वृक्षं	१८
४०.	जलदस्थ	७७

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

श्लोकाः		पृष्ठांकाः
४१.	जातं किं मम....	२१
४२.	ज्वलसि मम....	७९
४३.	तत्र स्थित्वा....	७८
४४.	तथैवं दृष्टा सा	७२
४५.	त्वया लब्धो देहः	७८
४६.	त्वां विधिर्विहित	९
४७.	दत्वा धान्य कणान्	१२
४८.	द्वितीयस्मिन् संलग्ने	४६
४९.	दृष्ट्वा दूरतः	२९
५०.	दृष्ट्वा द्विपसमूह	४८
५१.	देहो जर्जरितः	७
५२.	न कश्चिद्गृह्णीया	८०
५३.	ननीतः कालोयं	६०
५४.	न या वन्मे	२२
५५.	न संस्पृष्टो	६०
५६.	न हि श्वासोश्वासा	७४
५७.	निबद्धभावेन....	७६
५८.	नारीनरं समं दृष्ट्वा	३०
५९.	नैवं त्यजेत्सा	६७
६०.	पर्णं नलिन्या	३०
६१.	पतत्वेवं दुःखं	६१
६२.	पिता वांछेत्पुत्रं	६७
६३.	पिशाचा दुर्वृत्तिः	८
६४.	प्रभाते संजाते	४९

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

श्लोकाः		पृष्ठांकाः
६५.	प्रसुप्ता शय्यायां	७३
६६.	प्रातःकाले	१६
६७.	प्रियं यातं दृष्ट्वा	४७
६८.	प्रियां त्यक्त्वा	७६
६९.	बीजस्कंधफलं	४९
७०.	भवेच्छूरो युद्धे	७५
७१.	ममेच्छा	६१
७२.	मया भर्ता लब्धो	६१
७३.	मया सार्धं याता	७१
७४.	मरिष्यामीत्येवं	५९
७५.	मुकुलितनयनास्ते	६
७६.	मुग्धा शक्रनयेन	३७
७७.	मृता नैषा सत्यं	७३
७८.	मृदुलमधुर	२३
७९.	मंदाकिन्याः....	१६
८०.	य ए वासीज्जीवो	७५
८१.	यं यं वापि	७६
८२.	यः स्पृशेत्कन्यकामेनां	१२
८३.	यावन्मग्नः पयसि	४८
८४.	यो जीर्ण देहमकलं	१०
८५.	रसास्वादे कियान्	४९
८६.	रूढिमूलान्	२४
८७.	रे रे त्वं प्रियवल्लभो	५९
८८.	लब्ध्वा तोयनिधेः	९

CC-0. In Public Domain. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

	श्लोकाः				पृष्ठांकाः
८९.	वपुः शीतं सौम्यं	....	....	....	७३
९०.	वार्तैषा प्रसृता	....	....	....	८०
९१.	विधेश्चित्तात्स्रस्तं	....	....	....	७२
९२.	विरम विरम....	....	....	....	७७
९३.	विस्फार्य नेत्रे	...	...	....	३८
९४.	विषेणाक्तावोष्ठौ	....	....	....	७०
९५.	विषेणैवं दग्धा	....	....	....	७४
९६.	विहित परिणयौ	...	...	...	७०
९७.	वह्निना दुर्विनीतेन	...	....	....	२१
९८.	वंदे देव गणाधिनाथ	....	....	....	१
९९.	संयातः खलु....	....	...	....	२३
१००.	संसारस्य महोदधेः	....	....	....	२९
१०१.	सकष्टं गच्छन्ती	....	....	....	७१
१०२.	सकष्टं लब्धाया	....	....	....	७२
१०३.	सूत्रस्य ग्रथनां	....	....	....	३४
१०४.	स्थितैवं स्थाने	....	....	....	९४
१०५.	स्पर्शं विनाग्नेः	....	....	....	१७
१०६.	स्वार्थान्धता...	...	...	...	३७
१०७.	शालायामपि	....	....	....	७५
१०८.	श्वसन्त्येवं दुष्टा	....	....	....	७२
१०९.	हताशां दृष्ट्वा	...	....	...	३६

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

श्लोकाः		पृष्ठांकाः
६५.	प्रसुप्ता शय्यायां	७३
६६.	प्रातःकाले	१६
६७.	प्रियं यातं दृष्ट्वा	४७
६८.	प्रियां त्यक्त्वा	७६
६९.	बीजस्कंधफलं	४९
७०.	भवेच्छूरो युद्धे	७९
७१.	ममेच्छा	६१
७२.	मया भर्ता लब्धो	६१
७३.	मया सार्धं याता	७१
७४.	मरिष्यामीत्येवं	९९
७५.	मुकुलितनयनास्ते	६
७६.	मुग्धा शक्रनयेन	३७
७७.	मृता नैषा सत्यं	७३
७८.	मृदुलमधुर	२३
७९.	मंदाकिन्याः....	१६
८०.	य ए वासीज्जीवो	७५
८१.	यं यं वापि	७६
८२.	यः स्पृशेत्कन्यकामेनां	१२
८३.	यावन्मग्नः पयसि	४८
८४.	यो जीर्ण देहशकलं	१०
८५.	रसास्वादे कियान्	४९
८६.	रूढिमूलान्	२४
८७.	रे रे त्वं प्रियवल्लभो	५९
८८.	लब्ध्वा तोयनिधेः	९

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

श्लोकाः		पृष्ठांकाः
८९.	वपुः शीतं सौम्यं	७३
९०.	वातैंषा प्रसृता	८०
९१.	विधेश्चित्तात्स्रस्तं	७२
९२.	विरम विरम....	७७
९३.	विस्फार्य नेत्रे	३८
९४.	विषेणाक्तावोष्ठौ	७०
९५.	विषेणैवं दग्धा	७४
९६.	विहित परिणयौ	७०
९७.	वह्निना दुर्विनीतेन	२१
९८.	वंदे देव गणाधिनाथ	१
९९.	संयातः खलु....	२३
१००.	संसारस्य महोदधेः	२९
१०१.	सकष्टं गच्छन्ती	७१
१०२.	सकष्टं लब्धाया	७२
१०३.	सूत्रस्य ग्रथनां	३४
१०४.	स्थितैवं स्थाने	५४
१०५.	स्पर्शी विनाग्नेः	१७
१०६.	स्वार्थान्धता...	३७
१०७.	शालायामपि	७५
१०८.	श्वसन्त्येवं दुष्टा	७२
१०९.	हताशां दृष्ट्वा	३६

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized By Siddhanta eGangotri Gyaan Kosha

पंड्या कुलोत्पन्नेन गजेन्द्रशंकरेण गुर्जरगिरि विरचितानि पुस्तकानि ।

नाटकानिः—

(१) श्राव्य—वल्लभगर्जनाख्यान } ०–१२–०
गुर्जरीप्रसनाख्यान }

(२) दृश्य—मधोर्लग्नम् (एकाङ्की) ०–९–०

वकीलात एकाङ्की }
फोइबा एकं दृश्यम् } ०–९–०
मथुरीओ एकं दृश्यम् }

केलवणीकार ०–१२–०

काव्यानिः—

(१) संयुक्ताख्यान–(शृङ्गारकाव्य) ०–८–०

(२) तरङ्गमाला—(काव्यसमुच्चयः)
प्रकटीक्रियते

जीवनचरितानि—

(१) प्रेमानन्दसुत वल्लभः

(२) नरसिंह महेतो [गुर्जरसाहित्ये

CC-0. Prof. Satya Vrat Shastri Collection.